श्रीगणेशाय नमः ॐ अवधेरस्त्र यातीतनिर्मलज्ञानमूर्त्तये मनोगिरां विदूराय दक्षिणामूर्त्तये नमः
१ निगमान्तप्रतिपाद्याय निःसंगसुखसंविदे संसारतापनोदाय विद्याश्रीपतये नमः २ प्रत्यस्ताखिलभेदा
य जगज्जन्मभूमसाक्षिणे ज्ञानोत्तमगुरवे नमः प्रत्यक्सुखात्मने ३ नमः परमऋषिभ्यो नमो ब्रह्मविद्या
संप्रदायकर्तृभ्यः ४ इदं ब्राह्मणवाक्यं वादिनो वदनशीलाः वेदार्थविपरीतपक्षान्निर्मूलीकृत्य वेदार्थतत्त्वे
न ब्रह्मवदनशीलाः साक्षात्परंपरया वा सर्ववेदार्थत्वेन ब्रह्म वदन्तीत्येतत्सर्ववेदा यत्पदमामनन्तीति श्रुतेः
इममेव ब्राह्मणवाक्यार्थमोपनिषत्स्यदिमाश्चत्तरमंत्राः प्रतिपादयंति किं कारणमिति किं कारणं ब्रह्मजगदुपा
दानकारणं ब्रह्म किमन्यद्वा जगदुपादानकारणं ब्रह्म कीदृशं मविद्याप्रतिबिंबितं वा अथवा ब्रह्म किं कारणमविशे
षेण निमित्तोपादानकारणं वा आहोस्विन्निमित्तकारणमेव वा कुतः स्म जाताः आकाशादिवत्तस्थितिरवस्थायां ब्रह्म
ॐ परमात्मने नमः ब्रह्मवादिनो वदंति किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठाः अधिष्ठिताः
केन सुखेतरेषु वर्त्तामहे ब्रह्मविदो व्यवस्थामिति १ कार्यभूताः संतः सुषुप्तिप्रलयादिषूपादानकारणभूतं ब्र
ह्ममात्रतया विलयं गताः संतः प्रबोधसर्गादिसमये उपादानकारणभूतब्रह्मणः कार्यत्वेन वयं जाताः आहोस्वि
न्मूलचक्रस्थानीया घटकाष्ठस्थानीया वा वयं सुषुप्तिप्रलयादिषूपाधिविलये बिंबचंद्रमहाकाशस्थानीयब्र
ह्मैक्यमुपगताः संतः सम्यक्प्रबोधसर्गादिसमये ब्रह्मप्रतिबिंबकारणादिमे लोके बिंबचंद्रमहाकाशस्थानीयब्र
ह्मणः सकाशाज्जाताः जीवाम केन [illegible] सोऽहं जीवाम केन वयं जीवामः अदृष्टेन किं मोक्षेणावशेषितानि येनाहोस्वित्स्व
भावेन क्व च संप्रतिष्ठामो ज्ञानावस्थायामस्माकं विकारभूतं ब्रह्मलिंगे मकत्वेनावस्थानं उत्तरत्वेन प्रविकारित्वमायाम
लितत्वेन विकारित्वब्रह्मैक्यत्वेनावस्थानमाहोस्विद्विद्याख्यमायाविद्यया ब्रह्ममात्रतया विलाप्य विशुद्धे ब्रह्म.
ण्येकत्वेनावस्थानं क्व च संप्रतिष्ठाः स्थिम्यां ठमोत्तावस्थायां कीदृग्रूपे ब्रह्मणि वयमेकत्वेनावस्थितास्त्विया जपितेः

देवस्य सर्वजगदुत्पत्तिस्थितिलयकारणत्वात्तन्निर्वोढृतया वर्त्तमानत्वाच्छक्तिशब्दाभिधेयां मायां जगत्कार
णत्वेनापश्यन् तामेव पुनर्विशिनष्टि स्वगुणैर्निगूढामिति स्वस्य गुणैः स्वगुणैः सत्त्वरजस्तमोलक्षणैः
मूलप्रकृतेर्व्याप्यकत्वे सह तत्त्वादिगुणैर्वा निगूढां निलीनां संवृतां गुणविधुरकेवलब्रह्मेति स्वरूपस्य द्रष्टुमश
क्यत्वान्निगूढामित्युच्यते मायाजगतः परिणामिकारणत्वेनापश्यन्नित्युक्ते मायायाः स्वरूपप्रदत्वेन स्फुरण
प्रदत्वेन चाधिष्ठानत्वान्मायाविलसितप्रतत्तन्मात्रप्रमुखकारणानि निखिलानि तानि सर्वाणि पूर्वोक्तानि का
लप्रभृतीन्यात्मपर्यन्तानि तैः संयुक्तक्षिप्रतानि यानि तानि कालात्मयुक्तानीत्युच्यन्ते तानि सर्वाणि स्वरू
पप्रदत्तया अंशानं प्रवृत्त्या चाधितिष्ठति यः सच्चिदानन्दैकरसः एकोऽद्वितीयः परमात्मा तमपि सर्वाधिष्ठा
नत्वेन तेनैतिशीहकमपश्यन् ३ एवं मन्त्रोक्तप्रकारेण मायैवाध्यासमुपगतत्वेन जगदुत्पत्तिस्थितिलयका

देवात्मशक्तिं स्वगुणैर्निगूढाम् यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठ
त्येकः ३ तमेकनेमिं त्रिवृतं षोडशान्तं ॥ ॥

एवमुक्तं संसारचक्रं विवेकरसमात्मानं चक्रत्वेन निरूपयत्युत्तरो मन्त्रो वैराग्यहेतोः तमिति तं देवशब्द
निर्दिष्टमधिष्ठातारमात्मानं पूर्वमन्त्रे शक्तिशब्दनिर्दिष्टेन तत्त्वेन मायाशब्दनिर्दिष्टेनाव्यक्तप्रकृतिः संसा
रचक्रधर्मणेन निर्वाहकत्वेन नेमिः सा यस्य तमेकनेमिं त्रिवृतं त्रिभिः सत्त्वरजस्तमोभिर्वृतं त्रयं वर्त्तनिमित्तस्य
स्थितिसंहारसृष्ट्यात्मकत्वं सर्वत्र सुप्रतिष्ठानात्यो भिन्नत्रिभिर्वृतमावृतं षोडशान्तं प्राणः श्र
द्धा खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नं वीर्यं तपो मन्त्राः कर्म लोका नामेत्याख्याः प्रश्नोपनिषत्पठिताः षोडशकलाः अन्ते अव
सानं विस्तारं समाप्तिर्यस्य तं षोडशान्तं षोडश विकारा अन्तो यस्य तमिति वा प्राप्ताम् अरं निखिलशब्दविशेष

पंचस्रोतोंऽबुं पंचस्रोतो रूपेण विच्छेदेन विषयेषु वर्त्तंत इति चक्षुरादीनि पंचज्ञानेंद्रियाणि स्रोतांसि तान्यं-
बुस्थानीयानि यस्यास्तां पंचस्रोतोंबुं पंचयोन्युग्रवक्रां पंचयोनयः पंचतन्मात्रास्ताः पंचोग्राणि वक्राणि
वाहगतिसंततिवेगविशेषरूपकेतानि यस्यास्तां पंचयोन्युग्रवक्रां पंचप्राणोर्मिं प्राणादयः पंचवायव ऊर्मिस्थानी-
यास्ते यस्यास्तां पंचबुद्ध्यादिमूलां बुद्धीनामादिभूतानि कारणरूपाणि चक्षुरादिविज्ञानेंद्रियाणि तेषां मूलं विज्ञान-
शक्तिमदहंकारः सर्वसंसारमूलकारणं यस्यास्तां पंचावर्त्तां आकाशादीनि पंचमहाभूतान्युत्तरोत्तरमेकैकाधि-
कशब्दादिगुणान्यावर्त्तस्थानीयानि यस्यास्तां पंचदुःखौघवेगां गर्भजन्मव्याधिजरामरणदुःखान्यविद्यास्मितादी-

पंचस्रोतोंबुं पंचयोन्युग्रवक्रां पंचप्राणोर्मिं पंचबुद्ध्यादिमूलाम् पंचावर्त्तां पंचदुःखौघ-
वेगां पंचाशद्भेदां पंचपर्वामधीमः ५ सर्वाजीवे सर्वसंस्थे बृहंते तस्मिन् ....

नि वा पंचदुःखानि ओघः पूरस्तस्य वेगः ओघवेगः पंचदुःखान्येवौघवेगो यस्यास्तां पंचाशद्भेदां पंचाशद्व-
रभेदा यस्यास्तां पूर्वोक्ताः सर्व एवात्रापि गृह्यंते पंचपर्वां तमो मोहो महामोहस्तामिस्रो अंधतामिस्र इति पुराणे
प्रसिद्धानि पर्वाणि यस्यास्तां ईश्वरांतर्यामिसूत्रहिरण्यगर्भविराड्रूपाणि पर्वाणि वा यस्यास्तामेवंभूतां नदी-
मधीमः अधीमः स्मृतिपूर्वोक्तेषु विशेषणेषु प्रत्येकं संबध्यते ५ किं कारणं ब्रह्मेत्यस्य प्रश्नस्य परिहारमुक्त्वा कु-
तः स्म जाता इत्यादि प्रश्नस्य परिहारं वक्तुं उत्तरो मंत्रः प्रक्रमते सर्वाजीव इति सर्वाजीवे जंत्वादीनां श्रुत्यादिव-
र व्याघ्रादीनां मायादिवत् सर्वेषां चेतनाचेतनानां स्वरूपानंदस्फुरणप्रदत्त्वा आजीवनहेतुभूते सर्वसंस्थे सर्व-
लयस्थाने बृहंते बृहत्तिमति तस्मिन् ब्रह्मते मायाशबले ॥ ॥ ॥ ॥

त्रिविक्रममित्रप्रत्याहृत्य मनोबुद्ध्यहंकारचित्त ३

विंशं भगणकारणं भक्ता अकारादि पंचाशद्वर्णाः आशाद्वयं प्रत्येकं पश्यन्तं श्रोत्रं त्वक् चक्षुः जिह्वा घ्राणं वाक्पाणिपा
दपायूपस्थेति दशविषयशब्दस्पर्शरूपरसगंधवचनादानविहरणोत्सर्गानंदत्ति दश दिग्देवता ... वातादित्यवरुणाश्वियमा
ग्नीन्द्रोपेन्द्रमित्रप्रजापतयः बोधव्याहृतेर्नेत्रचेतयितृत्वमित्यन्तर्दश दिग्देवताश्चंद्रब्रह्मरुद्रक्षेत्रज्ञाः ... स्वधिकारे तेषु देवेषु प्र
प्राणापानव्यानोदानसमानाः पंचाशद्वर्णाः विंशतिप्रत्ययाश्चिः अष्टौ वसवो द्वादशादित्या एकादश रुद्रा
त्विद्या अश्विनौ प्रत्ययाः पूर्वोक्ता नामपदानि शब्दार्थप्रतिविधीयन्ते कीलात्तिप्रत्ययास्तेः श्रवणे युक्ते स्त्रीलिंगत्वं
दश अष्टके षड्त्वितो तत्त्वानि त्वक् चर्म मांस रुधिर मेदो अस्थि मज्जानः शुक्रं चेति धात्वष्टकं धर्म ज्ञान वैराग्यैश्व
र्याधर्माज्ञानावैराग्यानैश्वर्याणीति भावाष्टकं गोत्तमो ... रुद्रप्रकृतिरुद्रानुरूपा ... मंगला नायास्ताः सप्त

शतान्यष्टीरं विंशतिप्रत्ययाश्चि अष्टकैः षड्विं विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम् ४
अष्ट हेत्वात्मगुणाष्टकं आत्तिमा महिमा गरिमा लघिमा प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चेत्यैश्वर्याष्टकं भूमिरापो
नलो वायुः खं मनो बुद्धिरेव च अहंकार इतीयं ता अष्टधा अष्टकं ब्रह्मप्रजापती देवगंधर्वयक्षराक्षसाः पित
रश्च पिशाचाश्चाष्टदेवाष्टमुदाहृतमिति मनसर्वैश्वानपशुपक्षिमृगमनुष्यदेवदेवमस्त्येष्टकं वा एतैः षड्
ष्टकैरुपलक्षितत्समाहारैकप्रत्ययः विश्वरूपैकपाशं विश्वरूपैकतत्वादि ... विश्वरूपः कामः स एवैकः
प्रधानः पाशः पाशयते वध्यते येन स सर्वपाशः स पाशो यस्य तं विश्वरूपैकपाशं त्रिमार्गभेदं अर्चिरादिमार्ग
एको धूमादिमार्ग एको जायस्व म्रियस्वेत्यधोमार्ग एकः एते त्रयो मार्गभेदा यस्य तं त्रिमार्गभेदं द्विनिमित्तैकमो
हं द्वयोः पुण्यपापयोस्तन्मूलरागद्वेषयोश्च निमित्तकारणं तु देवैकं स एव मोहः अनात्मन्यात्माभिमानलक्ष
णो यस्य तं द्विनिमित्तैकमोहं अपदपदमिति क्रियापदमनुवर्तते अधीमहत्युत्तरमंत्रादाकृष्यते वा ५ माया
धिष्ठानत्वात्तद्विवर्तसर्वाधिष्ठानत्वेनसर्वात्मकमात्मानं पश्यन्त्येवं ... चक्ररूपेणानिरूपितमुत्तरोमंत्रोनः
हीरूपेणापिनिरूपणितिनितरां वैराग्यहेतोः ... ंपंचनेनेति

निर्दिष्ट आत्मा निर्जायायस्त्वमुत्वं सर्वकस्थितस्याह उद्गीतं उपरि वेदं प्रगीतं प्रतिपादितं एतस्मुक्तं ब्रह्म उद्गीथ
मित्येके पठंति तस्मिन्पक्षे प्रणव एवार्थः अथवा उत्तर उपरि साध्यसाधनरूपात्सर्वस्मात् उपरिगीतं कार्यकारण
त्मकसर्वप्रपंचशून्यत्वेन प्रतिपादितमित्यर्थः अत एतस्मुक्तं वस्तु परमं मुख्यं तु श्रेष्ठं ब्रह्म बृहत्तमं भवति सो
पाधिकत्वं व्यावृत्तिमाह तस्मिन्निति तस्मिन्निष्कलेऽसंगेऽविकारेऽनंते स्वसंविन्मात्रैकरसे आत्मनि त्रयं सत्वे
जस्तमआख्यं ब्रह्मविष्णुप्रियो वा स्वजायस्त्वमस्तुषुप्त्याख्यं विश्वतैजसप्राज्ञाख्यं लोकत्रयं वा स्थितं तत्सर्वं रज्ज्वादिषु
सर्पादिवत्तत्र सुप्रतिष्ठा स्वस्मिन्नेकस्मि तस्य हिरण्यगर्भप्रमुखचेतनाचेतनात्मकस्य स्वरूपप्रदत्वात्सुप्रतिष्ठा च
नं स्फुरणप्रदत्वाच्च प्रतिष्ठाप्रदं ब्रह्म स्वयं स्वाधनत्तासिद्धित्वात् अक्षरं च क्षरं सर्वमश्नाति व्याप्नोति न क्षरतीति वा
अक्षरं अत्रांतरं ब्रह्मादिपिपीलिकांते ब्रह्मिस्तमस्तात्मकत्वेनावस्थिते संसारचक्रे अंतरं सर्पव्यावृत्ते रज्ज्वा
दिवांतरं संविचित्सुखापरोक्षस्वभावमात्मानं वेदविदो यथावद्गुरुशास्त्राचार्यविदो विदित्वाऽपरोक्षीकृत्य तत्स

उद्गीतमेतत्परमं तु ब्रह्म तस्मिंस्त्रयं सुप्रतिष्ठाक्षरं च अत्रांतरं वेदविदो विदित्वा लीना ब्रह्मणि
तत्परा योनिमुक्ताः ७ संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः ॥ ॥ ८ ॥

राद्देहेंद्रियप्राणात्माभिमानं हित्वा निवृत्तिप्राप्य पुरुषार्थरूपे ब्रह्मणि सर्वात्माभिमानाः संतः तस्मिन्नेव ब्रह्मणि ली
ना एकीभूताः स्युः लयशब्दार्थं श्रुतिः स्वयमेव दर्शयति योनिमुक्ता इति मुमुक्षुः स्वरूपब्रह्मज्ञानं दृश्यं चैवधायकर्मा
पात्रनिवृत्तिर्विब्रह्मणि लयः प्राप्तिस्वात्मपि सैवेत्यर्थः ७ प्रवक्ष्यादिरूपप्रपंचरूपेण सर्वस्यात्मनो व्यक्ततत्त्वं मोक्षप्रकारं
चोक्त्वा ईशनीकारणरूपेण सर्वस्यात्मन्यप्रत्यक्तत्त्वमात्मनः संसारित्वप्रकारं मोक्षप्रकारं च दर्शयति संयुक्तमिति
संयुक्तं कार्यकारणेन संयुक्तं क्षरं क्षरतीति क्षरं मायाकार्यं आदि अक्षरं न क्षरतीति अक्षरं मायाख्यं महाप्रलयादावपि
स्थितत्वात् व्यक्तं अभिव्यक्तं नामरूपावस्थापन्नं आकाशादि अव्यक्तं अनभिव्यक्तं नामरूपबीजावस्थाप्रकृतिस्व
कं एतत्कार्यकारणरूपेण वर्तमानमिदं विश्वं यत्सर्वं सच्चिदानंदैकरसवपुरीश्वरः स्वरूपानंदस्फुरणप्रदत्वं
भरते बिभर्ति

ज्ञाज्ञाविति ज्ञाज्ञौ द्वौ बिंबस्थानीय ईश्वरोऽन्तः सर्वज्ञः प्रतिबिंबस्थानीयो जीवोऽज्ञः किंचिज्ज्ञः सोपाधिकबिंबप्रतिबिं
बभेदेऽप्यनादिसिद्धत्वमाह अजाविति अजौ जन्मरहितौ ईशः अनीशो बिंबस्थानीयः परमात्मेश्वरो नियंता स्वविधेयं प्रति
प्रतिबिंबस्थानीयो जीवोऽनीश्वरः । स्वस्वरूपे स्वसुषुप्तिप्रलययोरपि बुपाधेरभावेऽपि तन्निबंधनत्वेन जीवपरवि
भागोऽनस्यमवेत्तः स्वाभाविकत्वेन जीवपरविभागोऽभ्युपगंतव्यः सुषुप्त्यादावपि विद्यमानोपाधिसंबंधेऽपि उपाधेरान
त्यात्तन्निबंधनजीवानेत्यमप्यस्त्विति संप्रधार्याह अजा ह्येका भोक्तृभोगार्थयुक्तेति अज्ञानं जायत इत्यजा एका प्र
धानभोक्तुः प्रतिबिंबस्थानीयस्य जीवस्य बिंबस्थानीयस्य प्रवृत्तिः भोगादिधर्मोपाधिकत्वेन स्वयमप्यभोगादिधर्मव
तीस्थितौ चेदप्रच्चलनादिधर्मोपाधिकत्वेन स्वयमप्यचलनादिधर्मभावत्वेन स्थितौ ईश्वरयुक्तो चिरात्मा निदर्शिता
चेत्यर्थः मायोपाधिसंपर्कनिबंधनभेदादिकस्यानादित्वमस्त्विति ते सत्यमखंडसंविन्मात्रेऽप्यात्मनि सोपाधिसंगस्य
स्वतोऽपरोक्षस्वभावत्तया सदा विद्यत एव संसारकलिले यदा त्वुपाधिसंपर्कतत्त्वं तमेदादिविरुद्धधर्मादिकस्यनायम्

ज्ञाज्ञौ द्वावजावीशानीशावजा ह्येका भोक्तृभोगार्थयुक्ता अनंतश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विंदते ब्रह्म
ज्ञानाकाशमात्रे सोऽपि शुद्धाकाशादिर्विद्यत एव यथा तद्दर्शयत्याह अनंतोऽद्वितीय आत्मा निरुपाधिकस्वरूपः
विश्वरूपः सर्वकल्पनाधिष्ठानतया विश्वरूपः अकर्ता अविकारी हि यस्माद्विद्यते तस्मात्तत्र यः बिंबस्थानीयः परमात्मा
प्रतिबिंबस्थानीयः जीवः तयोर्गुणोपाधिस्थानीयो माया प्रकृतिश्च एतत्त्रयं यदा सम्यग्दर्शनावस्थायां ब्रह्म विंदते सस्य
मखंडचिन्मात्रं ब्रह्ममात्रतया विंदते लभते मुमुक्षुः तदा निःशेषनिखिलविकल्पप्रलयेन ननु द्वितीयब्रह्मलाभात्तक
र्तृत्वादिसकलसंसारधर्मविवर्जितः वीतमोहः कृतकृत्यो वतिष्ठत इति वाक्यशेषः ब्रह्ममिति पाठे संब्रह्मेति यावत्
तदा जीवेश्वरप्रकृतीनामनादित्वं प्रकृतिसंपर्कवशात् सर्वतत्त्वादिव्यवस्था जीवेश्वरप्रकृत्यात्मकं द्वैतजात
स्य निर्वृत्ताशेषविकल्पस्य सत्यमखंडसंविन्मात्रतया सम्यग्ज्ञानेन प्रविलयं चोपपाद्येदानीं द्वैतेतरनित्यतां प्र
॥ ९ ॥ स्वस्यानित्यतां उभयोरीश्वरेणानियम्यत्वात्तद्वैकत्वज्ञानात् जीवस्य मोक्षं च दर्शयति॥

अनीशश्चात्मा सुखसंवित्स्वरूप ईशश्चात्मा मायाधिष्ठानत्वेन मायाछन्नत्वात्तद्विलसितैर्देहधर्माद्यैरितस्ततान्वं
नीशश्चभवति अनीशो ज्ञानेश्वरभाव इत्यर्थः स्वरूपस्यानवधारणा बध्यते भोक्तृभावादित्यादिना कियाशक्तिमहं
कर्ता भोक्ता बुद्ध्युपाधिना सुखदुःखादीन् स्वधर्मत्वेन स्वीकृत्याहं कर्ता भोक्ता सुखी दुःखीति बध्यते स जन्मजन्मानु
ष्ठितनित्यनैमित्तिकजनितपुण्यनिकरैः प्रक्षीणपापस्य शुद्धान्तःकरणस्येश्वराराधनविधानस्ववर्णानुष्ठानेच्छा
समुपजायते ईश्वरसमाराधनविधानुष्ठितकर्मार्जितपुण्यनिचयैरीश्वरध्यानेच्छा समुपजायते ईश्वरध्याना
र्जितमहत्तरपुण्येन सर्वकर्मसंन्यासविध्यनुष्ठानेच्छा समुपजायते सर्वकर्मसंन्यासानुष्ठानजनितमहत्तरपु
ण्येन शमादिविध्यनुष्ठानेच्छा समुपजायते शमदमाद्यनुष्ठानजनितमहत्तरपुण्यैः श्रवणमनननिदिध्या
सनविध्यनुष्ठानेच्छा समुपजायते एवमनेकजन्मानुष्ठानपुण्यपरंपरानिचयैः प्रक्षीणाशेषरजस्तमोम
लो योग्याधिकारी मुमुक्षुस्तत्त्वदर्शिनं परमकारुणिकं गुरुं प्राप्य तत्संनिधौ तत्त्वश्रवणाद्यैरेव तदनुग्रहीत

अनीशश्चात्मा बध्यते भोक्तृभावात् ज्ञात्वा देवं मुच्यते सर्वपाशैः ८

तो श्रवणमनननिदिध्यासनानि सम्यक् कृत्वा मनननिदिध्यासनानुगृहीततत्त्वमस्यादिमहावाक्यादहं ब्रह्मास्मीति दे
वं ज्ञात्वा साक्षात्कृत्य परोक्षीकृत्य मुच्यते सर्वपाशैः पाश्यन्ते बध्यन्ते येनेति कार्यकारणलक्षणमविद्यादयः पाशाः स
र्वैः पाशैः मुच्यते ज्ञानेन सर्वसंसारपाशबीजाज्ञाननाशः चिन्मात्रपारिशेष्यात्तत्स्थलं सर्वं चिन्मात्रं तथा ली त
नं भवतीत्यर्थः ८ चेतनोऽचेतनः प्रकृतिरेकाऽचेतनरूपं जीवोऽपरः जीवः किंचिज्ज्ञः परः सर्वज्ञः जीवो नि
यम्यः परमात्मा नियन्ता जीवः संसारशतकलुषितः सर्वसंसारधर्मविनिर्मुक्तः परमात्मेत्यादि विरुद्धधर्मव्यव
हारः कथं सेत्स्यतीत्याशंक्याविद्यामुपाधिभूतमायाकल्पितभ्रांतिभेदात् सर्वव्यवस्था सिध्यतीत्याह यथा बिंबप्र
तिबिंबादि सर्वव्यवहाराणां स्वकीयेतेषु यथा स्वस्थ उदकशरावोपाधौ संपर्के तत्संपर्केवृत्तभेदादि विवर्ति बिंब
भूतत्वेन प्रसज्यमविता चलनगमनपरिच्छेदादि धर्मरहितः उदकपात्रस्थं प्रतिबिंबं वस्यं परिच्छेदचलन
गमनादिधर्मभागित्यादि विरुद्धव्यवहारास्त्वं दृश्यन्ते तद्वदत्रापि द्रष्टव्यं ॥ ॥

वृत्तोत्पत्तेः कर्तृत्वस्थितेर्नोभोक्तृपुरुषार्थसिद्धिरकामोऽहं ज्ञात्वेति ज्ञात्वा देवं प्रवृत्तं देवमात्मत्वेन ज्ञात्वाऽपरोक्षं दृश्यते
षां पाशापहानिः पाशपतेर्बध्यत एनेनेति रागद्वेषपुण्यपापादिलक्षणः सर्वसंसारहेतुः पाशस्तस्य सर्वस्यापहानिस्तत्त्वे
हः विद्याऽविद्यादाहेतुस्तस्मात् रागद्वेषदाहः रागद्वेषदाहेतुस्तस्माद्विहितप्रतिषिद्धक्रियाऽयोगात्तद्दाहः क्रियादाहे फ
लवत्पुण्यपापलक्षणादर्शनदाहः अदृष्टदाहे तन्निमित्तशरीरोत्पत्तेरभावात्प्रवृत्तिप्रयत्नदेहोत्पत्तिशरीरसंबंधनिमित्तसुखदुःखे
नानुभवति इत्यर्थः क्षीणैः क्लेशैः सम्यग्ज्ञानेन दग्धक्लेशैः उपलक्षितस्य तीर्णानि जो जन्ममृत्युप्रहाणिः ब्रह्मात्मैकत्व
दर्शनादात्मनि कर्तृत्वाध्यारोपणनिमित्ताऽविद्यादाहेन कर्तृत्वादिदाहात्तस्मात्तस्य कर्मणो दाहे सम्यग्ज्ञानात्प्रा
क्जन्मान्तरे वाऽनुष्ठितस्य सर्वस्य दाहात्तन्निमित्ताभावान्नैमित्तिकशरीरान्तरपरिग्रहलक्षणजन्मप्रहाणिः अत
एव तत्परित्यागलक्षणमृत्युप्रहाणिः सम्यग्ज्ञानात्सबीजस्य संसारदुःखस्य दाहमुपपाद्येदानीं तस्यैव विदुषः स्व
रूपानन्दाविर्भावलक्षणमोक्षपुरुषार्थसिद्धिमाह तस्येति तस्य प्रवृत्तस्य देवस्याभिध्यानादिति अभिमुखत्वेनात्म

ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं
केवल आप्तकामः ११

त्वेनाभिध्यानात्तु देहभेदे शरीरपातादिकार्यविद्यातत्कार्यलक्षणोपाधिभेदे देहस्य तृतीयं विश्वैश्वर्यमाविर्भूतं भवेत् केवल
कर्मणां धूमादिमार्गेण प्राप्तव्यं चन्द्रलोकैश्वर्यं द्युपासनेनार्चिरादिमार्गेण प्राप्तव्यं ब्रह्मलोकैश्वर्यं चापेक्ष्य तदपेक्षया
तृतीयं केवलसम्यग्ज्ञानैकलभ्यं कममार्गनिरपेक्षमात्मैश्वर्यमाविर्भूतं भवतीत्यर्थः स कालेन संसारदुःखनिवृत्ति
लक्षणं निरतिशयानन्दाविर्भावलक्षणं च मोक्षमुपपाद्य तदुभयं संक्षिप्य दर्शयति आप्तकाम इति केवलविद्यया
ऽग्न्याऽविद्यातत्कार्याशेषसंसारदुःखतयाऽऽप्तकामः काम्यन्त इति कामाः सर्वे कामा आत्मतया आप्ता अस्येत्याप्तकामः
एतस्यैवानन्दस्येति श्रुत्यन्तरात् ततः स्वरूपभूतब्रह्मानन्दाविर्भूतिरविद्याकार्यविद्यातज्जनितसंसारदुःखे च विध्या
स्वरूपमात्रतयाऽद्वितीयः पूर्णानन्दब्रह्मरूपोऽवतिष्ठते विद्वानित्यर्थः ॥११॥ तदात्मतत्त्वस्यैव ज्ञातत्वे सर्वं प्रमाण
प्रमेयतां निरतिशयपुरुषार्थत्वं चोपनिषत्प्रमेयतां चेतरस्याऽसंभावितां ज्ञानेनेत्यप्रस्तुतोऽन्यत्र प्रमेय
त्वमपुरुषार्थरूपत्वं च वेदप्रतिपाद्यत्वाभावं च जीवेश्वरादिप्रमेयस्य चिन्मात्रतां चाह॥

तिरस्मिन् योनौ शाकल्यतिरस्कारककाष्ठदाहकत्वेन गृहः गृह्यते उपलभ्यते अस्याऽभिव्यक्तस्मादि लिंगं च दृश्यते
यथा।। तद्वदयं स्वदेहगुणत्वेन देहेन तद्धातमयं विमर्शः वा अग्रहः तदुपमार्गः दाहेति किं स्वदाहमायात् तत्कार्यं तिरस्कृतत्वे
न विद्यमानस्य सुखसंवित्मात्रात्मस्वरूपं तिष्ठति तत्सद्भावे सामान्यतो नित्यत्वे मास्ति इत्यादि लिंगं च तदुभयं सम्यक्व
नात्माग्निविघातं गुणत्वेन गुणत्वात्स्वसाधनजनितवृत्तेः केवलं विघाय पूर्वं स्वतिरस्कारिकोऽविघातकौ देहदाहदेहे कार्यकर
णसंघाते अरणिस्थानीये आत्मतत्त्वाभिव्यक्तिः सत्वरमभिव्यक्ते रमानित्वादि लिंगं चोभयं विदधत्सु गृह्यते १३ सम्यग्ज्ञानात्
आगतात्मतत्त्वतिरस्कारककार्यकरणसंघातस्यात्माभिव्यक्तिः स्यात् तस्यात्मतत्त्वाभिव्यक्तेः हेतुः इह साधनगुणवस्यांतरंगसं
धननिदिध्यासनस्य चाधारारणिस्वरूपं निरूपयति स्वदेहमरणिं कृत्वेति स्वस्यात्मतत्त्वस्य तिरस्कारकमविघातकार्यक
रणसंघातलक्षणं देहमधरारणिं कृत्वा आत्मतत्त्वाभिव्यक्तिः स्यात् न हि केवलागुणत्वं च वेदसारमुत्तरारणिं कृत्वा सम्यग्ज्ञान
कारणत्वेन स्वीकृत्य ध्याननिर्मथनाभ्यासात् ध्यानं निदिध्यासनं तदेव निर्मथनं तस्याभ्यासात् देवं द्योतनस्वभावं स्वरूपं
स्तद्भावमयं स्वगुणत्वेन देहे १४ स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् ध्याननिर्मथनाभ्यासात् देवं पश्ये
न्निगूढवत् १४ तिलेषु तैलं दधिनीव सर्पिरापः स्रोतःस्वरणीषु चाग्निः।। निगूढमात्मतत्त्वं पश्येत् परोक्षीकु
र्यात् जानीयात् निगूढवत् पिशाचादिसंवित्तमहानिधि मत्तानाश्चिरकालाऽभ्यासेन यथा पश्यंति हि कृत्स्नमुत्तः स्व
ज्ञानादात्मतत्त्वं पश्यति १५ कार्यकरणसंघाते प्रत्यक्षेन आत्मदर्शनेन तत्त्वतः स्वत्वेन परोक्षतया आत्मदर्शनं भयं किंतु
षांतेनाह तिलेष्विति तिलेषु तैलं तिलेषु व्याप्य तिरस्कृततया वर्तमानं तैलं यंत्रनिपीडनेनाभिव्यक्तं सर्वे तिरस्कृतत्वे
न वर्तमानात्मतत्त्वाभिव्यक्ते दृष्टांत दधिनीव सर्पिः दधिनि मंथनेनाभिव्यक्तं नवनीतं समुद्भूतस्यानीयेन व
नीते अग्निसंपर्के विलयात् सुगंधितयोपरूपार्थत्वेनाभिव्यक्तं घृतं निर्मूलत्वेनाभिव्यक्तेः दृष्टांतः आपः स्रोतःसु
शुष्कासु नदीषु खननेनाभिव्यक्ता आपस्तापोपशमनकारणस्तत्ता आत्मतत्त्वाभिव्यक्तेः सर्वसंसारतापोपशमनहेतु
त्वेनोदाहरणं अरणीषु चाग्निः स्वदाहकारणीषु तिरस्कृतत्वेन व्याप्य स्थितो मथनेन स्वतिरस्कारककाष्ठादिदा
हकत्वेनाभिव्यक्तोऽग्निर्मोघातकार्यं तिरस्कृतात्मतत्त्वस्य मथनस्थानीयात्मदर्शनेन तिरस्कारकमायादाहकत्वे
नाभिव्यक्तो दृष्टांतः दधिनीवेत्यत्रैव शब्दः प्रत्येकं संबध्यते

एतदिति एतत्स्वरूपं ब्रह्म ज्ञेयं ज्ञातव्यं स्वप्रकाशसुखसंवेदनत्वसंभावितात्मज्ञानत्वात्सुखप्रार्थनासत्त्वाच्च नित्य
मेव सर्वप्रमाणैर्ज्ञेयं तत्र देवात्मसंस्थं आत्मत्वेन नित्यमेव सदा सम्यक् स्थितं अथवा आत्मनि कोपरे करणे स्मात्मेव
आधारे सम्यक् स्थितं प्रत्यक्त्वेन स्थितमित्यर्थः नातः परं आत्मतत्त्वात्परमन्यत् न वेदितव्यमस्ति ज्ञानार्हं न भवति
दृश्यत्वात् दृगन्यत्वे प्रमाणत्वेनानेन प्रतियोगित्वेन दृश्यस्यापि ज्ञेयत्वमंगीकर्तव्यमित्याशंक्याभेदज्ञानस्य प्रमाण
त्वाभावात्प्रमाणविषयत्वं जडस्य नांगीकर्तव्यमित्याह हि किंचिदिति अनात्मवस्तु जडत्वेन हेयत्वाद् संभावितात्मा
तत्त्वात्संवेद्यत्वासंभवो यस्मात्तस्मादात्मतत्त्वमेव सदा ज्ञेयं भोक्ता भोक्तारं जीवार्थं प्रधानकार्योपाधिप्रकाश
त्वाज्जीवं जीवं भोग्यं दृश्यजातं प्रेरितारं कारणोपाधिकमीश्वरं च मत्वा मे प्रथमे इमविद्यामयमेवेति मत्वा तत् कथितो
सर्वं भोक्तृत्वादिप्रभेदं त्रिविधं एतत्स्वरूपं ब्रह्मेति स्थाणुपुरुषन्यायेन प्रोक्तं प्रकथितं तात्पर्येण वेदान्ते
मुमुक्ष्वा भोक्ता भोग्यं प्रेरितारं प्रपञ्चमार्गे तोपायं तत् त्रिविधं सर्वमस्मिन् [illegible] ब्रह्म प्रोक्तं तात्पर्येण वेदान्तेति मत्वा भोक्ता

एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किंचित् भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं
ब्रह्ममेतत् ॥१२॥ वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिंगनाशः स भूय एवेन्धनयोनिगृह्यः ॥ ॥

त्वाध [illegible] प्रणवेन प्रविलापनेन निर्विशेषं ब्रह्म समताबुद्ध्या तदुपलभ्यो भवतीति वाक्यशेषः ॥१२॥ समर्थितं प्रत्यगात्मकं को
यं कारणं मुमुक्षुनिरतिशयानन्दात्मतत्त्वस्य गृह्णतया विद्यमानत्वे मोक्षसाधने नैव रूपतया अभिव्यक्तौ च दृष्टा
न्तेनोपपादयति वह्नेरिति वह्नेः सम्बन्धिनस्य योनिगतस्यारण्यादिकाष्ठगतस्य मूर्तिः स्वरूपं तेन दृश्यमारण्यादिकाष्ठ
निरस्त्वादृश्यानुपलभ्यते विद्यमानत्वे वर्तिरेकारणानुपलभ्यमानत्वमविद्यमानत्वादेवानुपलभ्यमानत्वं कस्मान्न भव
तीति चोदिते आह नैव च लिंगनाश इति अरण्यादेर्वह्निसद्भावस्य लिंगाभावे एतदेवस्यान्नैव च लिंगनाशः लिंगस्य वि
द्यमानत्वात् किं तत् सूक्ष्मस्य सजातीयत्वात् अत एव तदेवमप्यते न यत्किंचित् ननु तत्र वह्निर्गृह्यतया विद्यमानत्वान्न
तदेवमप्यते इति किं तु तस्यैव वह्निजन्मशक्तिमत्वात् तदेवमप्यते इति चेत् तदापि वह्निसद्भावो मंथनव्यापारशक्तिसंबंधेन
वह्निसद्भावस्यैवत्वात् प्रलयादौ कार्यकारणमात्रतया सीदिति श्रुतिर्युक्ते प्रतिपादितत्वाच्च स भूय एवेन्धनयोनिगृह्यः
समभ्यनात्मारणिकाष्ठावयववर्तिस्त्वेन तत्त्वेन विद्यमान एव वह्निर्मथ्यमानयोरिन्धनयोनिरिन्धनमेवयोनिरिन्धयो

श्वे॰ह॰
८

निमित्तमीश्वरस्याह युंजान इति युंजानः योजयन् श्रुत्यंतर्गतं जपमिदं प्रथमं समाध्युपक्रमसमये चित्तं मनः परमा
त्मनि योजयन् सविता अध्यात्माधिभौतेर्मित्रं प्रपंचप्रसवगुणयुक्तः परमेश्वरः किमर्थं तत्त्वाय आत्मतत्त्वाय परोक्षा
य धियः मनो विक्षेपहेतुभूततत्त्वज्ञानेंद्रियाण्यस्तु रागादिभ्यो वियोज्य आत्माभिमुखं कर्तुमिति संयोजयन् अग्नेर्ज्योतिरग्नेरित्यु
पलक्षणं अग्न्यादिसर्वं ज्योतिषां ज्योतिरित्यस्य तत्त्वस्य सिद्धं निचाय्य निश्चित्य पृथिव्या अध्याभरत् पृथिव्या
इत्युपलक्षणं पृथिव्यादिपंचभूतात्मककार्यकारणसंघातादपि तत्संघाते तत्रापि बुद्धौ आभरत् आहृतवांस्तदर्थ
भूतं ब्रह्मज्योतिः कार्यकारणसंघाते प्रत्यक्त्वेनाभिव्यनक्तीति यावत् १ सवितृशब्दवाच्यं सर्वलोकाधिष्ठातारं परमे
४
श्वरं आराधयितात्मतत्त्वार्थेनाफलमाह सवितुरिति सवितुः प्रसादितस्य देवस्य सवे अनुज्ञायां सत्यां तत्समाराधये
नात्मनैकाग्र्यगुणयुक्तेन मनसा परमेश्वरप्रसादेन संपन्नाः समाधिसाधनकलापाः सुवर्गेयाय सुवर्गशब्द

युंजानः प्रथमं मनस्तत्त्वाय सविता धियः अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत् १ युक्तेन मनसा व
ज्ञाप॰२ यं देवस्य सवितुः सवे सुवर्गेयाय शक्त्या युं मनसा देवान्सुवर्यतो धिया दिवं बृहज्ज्योतिः करिष्यतः सविता
प्रसुवाति तान् २

वाच्यनिरतिशयानंदाभिव्यक्तिहेतुभूतज्ञानसाधनश्रवणादि कर्म तेन शक्त्या परमेश्वरप्रसादादुद्भूतेन बलेन वयं
यतामहे इति वाक्यशेषः मुमुक्षूणां विदुषामनुग्राहकत्वं परमेश्वरस्य स्वभाव इत्याह युक्त्वायेति युक्त्वाय परमात्मा
नं योजयित्वा केन एकाग्र्यगुणयुक्तेन मनसा देवान् द्योतनस्वभावान् ब्रह्मेंद्रादीन् सुवर्यतः सुवः शब्दवाच्यनिर
तिशयानंदस्वभावं यतः गच्छतः दिवं द्योतनस्वभावं बृहत् बृहद्ब्रह्मतीर्यं ज्योतिः चित्प्रकाशं धिया करिष्यतः धिया आविः
करिष्यतः मनसः प्रत्यक्प्रावण्यमापाद्य प्रत्यक्प्रवणमनो जनिता अहं ब्रह्मास्मीति बुद्ध्या द्वितीयस्य रवसं वित्स्वभा
वब्रह्मप्रत्यक्त्वेनाविष्करिष्यतः इत्यर्थः सवितृशब्दवाच्यः परमेश्वरः प्रसुवात्यनुजानाति
तान्मुमुक्षून्देवान् ब्रह्मेंद्रादयोपि परमेश्वरप्रसादलब्धचित्तैकाग्र्यसाधनब्रह्मा
त्मैकत्वज्ञानेन तन्मया बभूवुरित्यर्थः ॥ परमात्मने नमः ॥ ॐ ॥ २ ॥

८

एवमात्मात्मनि गृह्यतेऽसौ एवं यथा पूर्वदृष्टांतस्तथात्मा यच्छतीति यदा इत्येयच्छतीति विद्यानिह यज्ञास्यतंततो
भवति तस्मादात्मात्मनि स्थितः आत्मनि देहेंद्रियसंघाते तत्रापि बुद्धौ च गृह्यते अभिव्यज्यते श्रवणादिभिः सत्येन सत्य
वदनेन सत्यशब्दोपलक्षितयमकलापेन वा एनं प्रकृतं स्वमात्मानं तपसा वा बाह्यांतःकरणनिरोधलक्षणेन मनस
श्चेंद्रियाणां च ह्यैकाग्र्यं परमं तप इति स्मृतेः तत्त्वंपदार्थशोधनं अनुस्यूतस्य पश्यत्यपरोक्षीकरोति यो मुमुक्षुस्तेनैव स
म्यग्गृह्यते आत्मात्मनि देहेंद्रियादिसंघाते सम्यग्ज्ञानेन प्रमेयवत्तया गृह्यत इति प्रमेयत्वाद्वेकं चतुःश्रोतं ब्रह्म वा इदमग्र
आसीत्तदात्मानमेवावेदिति श्रुत्यंतरात् आत्मा स्वेन स्वयमेव गृह्यत इत्यर्थः १५ मोक्षसाधनात्मविद्यातत्र
साधनतपसोः परमात्मैव निमित्तं ताभ्यामभिव्यक्तः अयमेवेति निर्दिशन्निहोक्तप्रकरणार्थं चोपसंहरति सर्वव्यापिन
मिति सर्वव्यापिनमध्यात्मादिभेदभिन्नं जगदंतर्बहिश्च व्याप्य स्थितं आत्मानं अत एवात्मशब्दाभिधेयं क्षीरे

एवमात्मात्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति १५ सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवा
र्पितम् आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परं तद्ब्रह्मोपनिषत्परं १६ इति श्वेताश्वतरोपनिषदि प्रथ

सर्पिरिव सर्वेषु सर्वत्वेनार्पितं आत्मसमर्पकत्वेन स्थितं आत्मविद्यातपोमूलं आत्मविद्यातपसोः सत्त्वेन निमि
त्तं आत्मविद्यातपसी यस्य मूले अभिव्यंजके तदात्मविद्यातपोमूलमिति वा तद्ब्रह्मेत्येवं हृदाद्धि सर्वत्तं ब्रह्मादि
तीयमुपनिषत्तदुपगमात्मत्वेन निषीदति निःशेषमविद्यातन्मूलं हंतनं सम्यग्ज्ञानफलेको रूढं सर्वत्ता
वन्मात्रत्वादस्याग्रत्यक्षेनावस्थितमित्यर्थः परं उत्कृष्टं निरतिशयानंदतयाविर्भूतं वियादित्यध्याहारः द्वि
र्वचनमध्यायसमाप्तिद्योतनार्थं आदरार्थं वा ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छंकरभगवत्पूज्यपा
दशिष्यस्य विज्ञानात्मभगवतः कृतौ श्वेताश्वतरोपनिषद्विवरणे प्रथमोऽध्यायः ॥१॥ नमः परमात्मने ॥
यदात्मनः तपोविद्यामूलत्वमुक्तं तदेवोपपादयितुं प्रत्यक्षप्रतिभा मंत्राः प्रथमं वा बाह्यांतःकरणनिरोधलक्षणस्य

संप्रुषीशशीसंकाशाश्चित्तवृत्तिः प्रवर्त्तते एवं नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनां धवृ

योगमभ्यस्यतस्तत्सिद्धिचिन्हान्याह नीहारेति नीहारस्तुषारस्तदाकारा प्रथमं चित्तवृत्तिः प्रवर्त्तते तदनंतरं धूमव
च्चित्तवृत्तिः प्रवर्त्तते तदनंतरमर्कवत्तत्प्रवर्त्तते तदनंतरमग्निवत् आभाति तदनंतरं वायुरंतरा वा एव वायुर्वेत्र च
तुभितो वत्स्रवान्प्रवर्त्तते तदनंतरं खद्योतनिभा चित्तवृत्तिः प्रवर्त्तते तदनंतरं विद्युन्निभा तदनंतरं स्फटिकनिभा त
दनंतरं शशीनाञ्चन्द्रसदृशाऽस्ये तानि योगिनोऽनुभवसिद्धान्येतानि बुद्धरूपाणि योमेरि प्रमाणं ब्रह्मण्यभिव्यक्ति
कराणि ब्रह्माभिव्यक्तिद्योतकानि पुरःसराणि पूर्वरूपाणि लिंगानि क्रमेणाविर्भवंतीत्यर्थः ब्रह्मणि ब्रह्म
विषययोगे चित्तवृत्तिनिरोधलक्षणेऽभिव्यक्तिकराणि द्योतकानि ब्रह्मविषयचित्तवृत्तिनिरोधलक्षणयोगस्या
भिव्यक्तिकराणीति यावत् ११ भूतजयप्रकारं भूतजयफलं चाह पृथिवीति पृथिवीतत्त्वमंडलं निर्दिश्य सम्यक्
तिं चात्मसात्कारेणोपास्ते तेनोपासनेन तद्वशीकरणे सति अनंतरमाप्यं तन्मंडलं प्रति यावत्तच्छक्तिं

नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनां एतानि रूपाणि पुरःसराणि ब्रह्मण्य
भिव्यक्तिकराणि योगे १२ पृथिव्यप्तेजोनिलखे समुत्थिते पंचात्मके योगगुणे प्रवृत्ते न तस्य रोगो न जरा न
मृत्युः प्राप्तस्य योगाग्निमयं शरीरम् ॥ १२

चाहं त्वेनात्मभावयित्वा तेन तद्वशीकरणे सत्यनंतरं तेजोभूतं तन्मंडलं विधाय तत्तच्छक्तिं चाहं तया चिंतयित्वा
तेन तत्तद्वशीकारणे सत्यनंतरं वायुभूतं तन्मंडलेशात्याप्य तच्छक्तिं चात्मभेदेनोपास्यते तेन तद्वशीकरणे सत्यनंत
रं वियद्भूतं तन्मंडलेशात्स्यतीतास्य तच्छक्तिं चात्मभावेन भावयित्वा तेन तद्वशीकरणं कृत्वा एवं पृथिव्यामप्सु
तेजसि वायौ खे च क्रमेण समुत्थिते ध्याने तत्तत्स्वप्रभुत्वे कार्ययोग्यतया वशीकृते पंचात्मके योगगुणे प्रवृत्ते पृथि
व्यादितन्मंडलेतच्छक्तीनामुत्तरोत्तरत्रयेण सर्वं सर्वत्रयं वेष्टितं बुद्ध्वा तत्सर्वं स्वाभेदेन चिंतयित्वा तेनोपास
नेन पंचभूतात्मके योगगुणे प्रवृत्ते भूतपंचकस्य पृथक् विनियोज्यत्वयोग्यतालक्षणे योगगुणे यस्य योगि
नः प्रवृत्ते निष्पादिते तस्य योगे ध्याने तद्वाग्नियोगाग्निस्तेन ध्यानेन वशीकृतपंचभूतात्मकं शरीरं प्राप्तस्य तत्त्वं
स्मीत्यभिमातुस्तत्फलं सिध्यति १० ॥ ११ ॥ १२ ॥

एवंभूतो ब्रह्म सर्वमेव प्रपंचयति दुरवगाह्यत्वात् एको ऽद्वितीयः हि यस्माद्रुद्रः सर्वं रोदयति संहरति प्रलयकाले इति रुद्रः
रुजं संसारदुःखं द्रावयतीति वा रुद्रः तस्मान्न द्वितीयाय द्वितीयभावाय तस्थुः स्थितवन्तः अद्वितीयमस्य सुखबोधरू
पत्वाद्रुद्रस्य तदधीनसत्तास्फुरणत्वात् मायायास्तत्कार्यस्य प्रपंचजातस्य अनेन तस्य सत्तो रुद्रस्य सद्वितीयत्वाऽपेक्ष
त्वेन कार्यकारणरूपाः सर्वपदार्थाः स्थातुं न शक्ता इत्यर्थः द्वितीयाय प्रमाणन्यायाश्च न तस्थुरिति वा द्वैतस्याविचा
रितरमणीयतया अविद्यात्मकत्वेन प्रमाणन्यायायोग्यत्वात् द्वितीयाय प्रमाणन्याया न तस्थुरित्युक्तं अथ तस्य पदे पदे
अद्वितीयत्वेन प्रतिपादनात् परमार्थतो ऽद्वितीयभावप्रतिपादनात् द्वैतस्य पदे पदे तात्पर्याभावेनिवर्त्यत्वेन प्रतिपादना
त्वमित्याह सिद्धं य इमांल्लोकानीशत ईशनीभिः प्रत्यङ् जनास्तिष्ठतीत्येतत्सर्वमेवमास्मातात्पर्यः संचुकोचान्तकाले
संचुकोच संचुकोच प्रतिसंहरति अन्तकाले प्रलयकाले संसृज्य विश्वा भुवनानि सर्गकाले विपरीतं च समुहाभ्यता
नि सृष्टानि विस्तारस्वरूपाणि विश्वानि भुवनानि संसृज्य सत्तास्फुरणप्रदत्वेन सम्यक् सृष्टा गोप्ता स्थितिकाले ऽनेन प्र

एको हि रुद्रो न द्वितीयाय तस्थुर्य इमांल्लोकानीशत ईशनीभिः प्रत्यङ् जनास्तिष्ठति संचुकोचान्तकाले संसृ
ज्य विश्वा भुवनानि गोप्ता ॥२॥ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् सं बाहुभ्यां धम
ति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥३॥

इदानीं रुद्रत्वेन गोप्ता भवति रुद्रादिस्तंबपर्यन्तानां प्राणिनां कार्यकारणा
नीश्वरस्यैव कार्यकारणानीति प्रतिपादयति कार्यकारणानि स्वमायया सृष्ट्वा तेष्वनुप्रविश्य जीवरूपेणाभिव्यक्तत्वेनेश्व
रस्यैव स्थितत्वात् आब्रह्मस्तंबपर्यन्तानां प्राणिनां चक्षूंष्यस्येति विश्वतश्चक्षुः विश्वतश्चक्षुरुत अपीति उत्तरत्र सर्वत्र स
मानं वयोजना इतरेंद्रियाणामप्युपलक्षणमेतत्सर्वप्राणिनां करणानां संयोजयिता अयमेवेत्याह सं बाहुभ्यामिति
बाहुभ्यां मनुष्यादीन् संधमति संयोजयति अनेकार्था हि धातवः संपतत्रैः पतनसाधनैः पादैः संधमति उपलक्षणमेत
दिति इतरेंद्रियैः संयोजयिता त्वमप्युक्तं द्रष्टव्यं अथवा पतत्रैः पक्षैः पक्षिणः संधमति सदेशोनिर्माता एवेत्याह द्यावा
भूमीति द्यावाभूमी उपलक्षणमेतत् सर्वलोकानां सर्वपदार्थांश्च सर्वान् जनयन्नुत्पादयन्
देवो द्योतनस्वभावः एक अद्वितीयः संधमतीति पूर्वेणान्वयः ॥३॥ ॥ ॥ ॥

तनुवा तनुवा निष्कलस्वरूपया शंतमया सुखतमया अद्वितीयानंदस्वरूपया गिरिशंत हे गिरिशंत गिरौ पर्वते कैलासाख्ये
स्थितः शं सुखं तनोतीति गिरिशंत गिरिशाद्वेदात्ते एतस्य वानंदस्य स्यात्तो ब्रह्मेन्द्रादीनां सर्वेषां सुखदातृत्वेन प्रसिद्धत्वाद्वा
गिरिशंत अभिचाकशीहि अभि आभिमुख्येन प्रत्यक्त्वेन अभिचाकशीहि प्रकाशस्व मुमुक्षून् प्रति तत्त्वमिति निष्कलस्वरूपेण न
निष्कलरूपेण स्वप्रकाशस्वरूपतया वद ५ घोरां सगुणां तनुं हित्वा सम्यक्ज्ञानसिद्ध्यर्थं मुमुक्षोः प्रार्थनामाह यामिषुमि
ति यामिषुं शास्त्रप्रसिद्धां सर्वसंहारसमर्थत्वेन प्रसिद्धां बाणं गिरिशंत आख्यातमेतत् हस्ते बिभर्षि धारयसि अस्तवे क्षेप्तुं उपसंहृ
तं ब्रह्मान् प्रति ते शिवां शुभां गिरित्र गिरौ स्थितः सन् सर्वं त्रायति अवति रक्षतीति हे गिरित्र तां सर्वसंहारसमर्थत्वेन प्रसि
द्धां शिवां कुरु कुर्विति पूर्वेणान्वयः मा हिंसीः पुरुषं जगत् मा हिंसीः हिंसां मा कार्षीः किं पुरुषं सम्यग्ज्ञानसाधनभूतकार्यक
रणसंघातं जगत् सम्यग्ज्ञानकारणानि कर्तृभूतवेतना चार्थः किं यावत् सम्यग्ज्ञानेन न भवति निष्कलस्वरूपाविर्भावस्ता
वत् सम्यग्ज्ञानायोग्यत्वेन मा हिंसीरित्यर्थः ६ इदं सगुणनिर्गुणतत्त्वज्ञानान्मोक्षमाह ततः परमिति ततो हेतुप्रसादे वयथावर

स्तनुवा शंतमया गिरिशंताभिचाकशीहि ५ यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे शिवां गिरित्र तां कुरु मा हिंसीः पु
रुषं जगत् ६ ततः परं ब्रह्मपरं बृहन्तं यथानिकायं सर्वभूतेषु गूढं विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वा अमृता भवं ति

ज्ञात्वा अमृता भवंतीत्यन्वयः कीदृग्भूतं देवं ज्ञात्वा अमृता भवंतीत्यपेक्षायामाह परं ब्रह्मेत्यादिना परं ब्रह्म निर्गुणं ब्रह्मप
रं तत्त्वं सुखस्वरूपं बृहंतं कूटस्थं अद्वितीयं नित्यं दृशामिति विशेषणत्वात् नपुंसकलिङ्गनिर्देशः यथानिकायं यथायथा कायंक
रणसंघातलक्षणानि कायं स्वतो निर्विशेषः संस्तथा तथा वगम्यत इति यथानिकायं चिकोणत्वाद्यवस्था विशिष्टः सो
नुगवद्भवति सर्वभूतेषु गूढं ब्रह्मादिस्तंबपर्यंतेषु भूतेषु गूढं वियदादिमहाभूतेषु गूढं सर्वविकारेषु गूढं विश्वस्यै
कं परिवेष्टितारं मायावीव मायया हस्त्यादीन् परिवेष्ट्य स्थितः मृगतृष्णिकोदकरजतादीनि शुक्तिकादिः परिवेष्ट्य
स्थितो यथा तथा विश्वस्य परिवेष्टितारं परिपूर्तिः अंतर्बहिश्च वेष्टितारं अत एकमद्वितीयमीशं तं सर्वभूतेष
कंठस्वरूपमीश्वरं तं प्रत्यक्त्वेन ज्ञात्वा अपरोक्षीकृत्य अमृता भवंति नित्यसिद्धब्रह्मभूता भवंति एकत्वदर्शनेनेव्य
वधायिकाविद्यानाशाद्भवंतीत्युपचारः ॥ ७ ॥ ॥ ॥ ॥ ॥

13

अधिकरणाधिष्ठातॄणां समष्टिकरणाभिमानिनामग्न्यादिदेवतानामुत्पत्त्यादिहेतुत्वं सर्वकरणव्यापि समष्टेः
करणाभिमानि हिरण्यगर्भोत्पत्तिहेतुत्वमीश्वरस्य मुख्यमीश्वरात्तु सम्यग्ज्ञानप्राप्तिं चाह यो देवः स्वयंप्रकाशः देवा
नामग्न्यादीनां प्रभवश्च उत्पत्तिरस्मादिति लोकोत्पन्नभवो यस्मिन्प्रभवो लयस्थानमित्यर्थः उद्भवश्च उद्भवत्यस्मादित्यु
द्भवः उत्पत्तिस्थानमिति यावत् अनेकार्था ह्युपसर्गाः विश्वाधिकः विश्वस्मात्सर्वाधिकश्चेति विश्वाधिकः अधिक उत्कृ
ष्टः निरतिशयानन्दस्वभाववृत्ति यावत् विश्वस्मादधिक इति वा श्वावा यो देवानां प्रोक्तेन स्वभावानामखिलभावानां वृत्ति
विवलक्षणानां अखण्डभाव स्वभावत्वादीश्वरो विवर्तयाप्रलयोत्पत्तिहेतुरिति अखण्डभावस्वभावत्वमुक्तं विश्वाधि
कत्वप्रापणातिशयानन्दस्वभावमुक्तं रुद्रो व्याख्यातमित्येवं इति केचित्पठन्ति महर्षिः महांश्चासावृषिश्चेति महर्षिः
महानिति वेग्रहमहत्त्वसंपन्न ऋषिः सर्वज्ञः हिरण्यगर्भं जनयामास पूर्वं समष्टेः करणाभिमानिनं हिरण्यगर्भं ज

यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं जनयामास पूर्वं स नो बु
द्ध्या शुभया संयुनक्तु॥ ४ या ते रुद्र शिवा तनूरघोरापापकाशिनी तया न॥ ।५॥ ५॥

नयामास उत्पादितवान् पूर्वं सर्गादौ सः अपास्तातिशयानन्दैकरसबोधविग्रहः परमेश्वरः नः शमादिसाधनसंप
न्नान् योग्याधिकारिणः अस्माञ्छुभाऽपवर्गहेतुभूतया शुभया बुद्ध्या अभयवस्तुविषयया अपास्तातिशयानन्दैकरसेऽवि
षयया संयुनक्तु संयोजयतु ४ अस्य श्लोकेनेतिः सङ्गमुखं विश्वमात्रेकरसंसारस्याविर्भावानुध्यासनं मुमुक्षोराह ये
ति याश्रुतिस्मृतीतिहासपुराणेषु प्रसिद्धा ते सकलनिष्कलतनौ तव हे रुद्र संसारतापोपशमनहेतुभूता
याः निष्कलतनोः शिवेन्दुशान्तवप्रमाणमित्याह रुद्रेति शिवा शुभा जडत्वदोषसंरहिता अपास्तातिशया
नन्दस्वभावा च तनुः तनुर्निष्कलस्वरूपा अघोरा प्रसन्ना संसारतापोपशमनरूपा अपापकाशिनी पापप्रकाशनी न
भवतीत्यपापकाशिनी स्वाभिव्यक्त्या सर्वपापदग्ध्रीत्येतत् पुण्यप्रकाशिनीति वा सर्वा श्लेकः सर्वपुण्यफलत्वात्
अपहतपाप्मादिस्वरूपा वा तया नः साधनचतुष्टयसंपन्नान् अस्मान्॥ ॥५॥ ५॥

मि

पुरस्तात्तमेवं तत्तान वर्त्तमानं पुरुषमपार्थ्यस्त्वार्थः एकत्वज्ञानहीनानामितरसाधनानां लोके विनापुरुषापार्थित्वं वेदेति नमेत्यस्य तिमृत्युतद्दुःखं
मेवैत्याह। ततद्इति यस्मात्रीणां कर्तृत्वाद्येकैवेत्यसिद्धिः ततस्तस्मादुत्तरतरं प्रब्धवामपर्यायापकेऽजोरेः सर्पादिवाधो दिति
तत्वादुत्तरत्वं वद्द्रकादिव्यापकत्वात् दिहंचकादित्येव विस्थितत्वादुत्तरत्वं वक्षोति कल्पयेविभूतानां स्थितत्वादुत्तरत्वं वच व्याप्य
व्यापकभावेन वर्त्तमानानां ब्रह्मादि प्राकृतानां हेयभूतानां सर्वेषां सत्तानुसरणं प्रवृत्तया व्यापकः पुरुषः उक्तो यत्तत्ततस्मात्
इति प्राकृतानां वाधेऽविस्थितत्वादुत्तरतरं प्रप्य वाप्रभृति प्राकृतानां हेयभूतानां सर्वेषामधिष्ठानत्वेन व्यापकोयत्ततस्मात्
तदुत्तरतरं ब्रह्म । उत्तरं यत्तद्रूपं कार्यकारणादिरूपहीनं कार्यादिरूपहीने वा उपलक्षणमेतेन रूपरसादिना हीनं वा अ
नामयं दुःखरहितं संसाररोगशून्यमुक्तं विशेषणं तत्परार्थ्यं सतमी च्चस्तत्वे एतत्तत्वं परार्थ्य मस्तं प्रत्यगात्मत्वेन ये साधनच
तुष्टयसंपन्ना यो याधिकारिणो विदुःपरोत्ती कुर्युस्ते ऽपरोत्ततानवं तत्वकत्व विषयाऽपरोत्ततानामन्त्वरूपव्यवधाविका
विद्यातत्कार्यद्वैतभ्रमं स्वरूपमात्रतया प्रविलाप्य अमृता भवंति नित्यसिद्धस्वरूपा भवंति । अथेति पक्षांतरे एकत्वज्ञान

ततो यदुत्तरतरं तदरूपमनामयं य एतद्विदुरमृतास्ते भवंत्यथेतरे दुःखमेवापियन्ति १० सर्वाननशिरो-
ग्रीवः सर्वभूतगुहाशयः सर्वव्यापी स भगवान् तस्मात्सर्वगतः शिवः ११ ॥ ॥ ॥

मज्ञाहिनस्य साधनांतराणां बलं ये स्थितास्ते इतरे दुःखमेवापि यंति उपर्युपरि दुःखमेव प्राप्नुवंति न सुखलेशमपि १०
इत्युक्तस्याद्वितीयत्वसिद्धये प्रत्यगात्मत्वमेव व्यनक्त्याह सर्वेति सर्वकार्यकारणानि स्वमायया सृष्ट्वा जलचंद्रवत्ते ष्वनु
प्रविश्य जीवइति नामांतराभिलप्यत्वेन स्थेयेवस्थितत्वात्सर्वाण्याननानि सर्वाणि शिरांसि सर्वा ग्रीवा अस्येति स
र्वाननशिरोग्रीवः ब्रह्मादिस्तंबपर्यंतानां सर्वेषामाननादिरस्येति वा विग्रहः इतरावयवानामप्युपलक्षणमेतत् सर्वभू
तगुहाशयः ब्रह्मादिस्तंबपर्यंतानां सर्वेषां भूतानां हृदयकुहरे प्रत्यक्त्वेन स्थितत्वादिति सर्वभूतगुहाशयः सर्वव्यापी सम
रूपेण स्थितानां सर्वेषां धीसर्वृत्तीनामस्त्रुतिशीलमस्येति सर्वव्यापी स भगवान् समग्रैश्वर्यधर्मयशः श्रीज्ञानवैराग्यानां व्या
भगाश्रस्येति भगवान् सर्वाननशिरोग्रीवत्वात्सर्वभूतगुहाशयत्वात्सर्वव्यापित्वाच्चवद्ददार्थत्वाच्च सर्वगतः स
र्वतो गतः सर्वत्वेन गतो वाऽद्वितीयः इति यावत् शिवः अविद्यातत्कार्यमलरहितत्वान्निरतिशयानंदस्वभावत्वाच्च शिवः

परमेश्वर एव स्वमायया सर्वकार्यकरणानि सृष्ट्वा तेष्वनुप्रविश्य जीवाख्यां लभत इति पूर्वेषां कार्यकरणानामीश्वरस्यैव का
र्यकरणत्वमीश्वरस्य स्वतो विशुद्धतां चाह सहस्रशीर्षेति सहस्रशीर्षा सहस्राण्यनंतानि शीर्षाण्यस्येति सहस्रशीर्षा पुरुषः
पुरिशयनात्पूर्णत्वाद्वा पुरुषः सहस्राक्षः सहस्रपादित्यादावपि एवमेव योजनाप्रकारः स भूमिं विश्वतो वृत्वा स प्रकृतः परमेश्वरः पुरुषः
भूमिं भूम्युपलक्षितं भूतभौतिकं सर्वं विश्वतः सर्वतः अंतर्बहिश्च वृत्वा व्याप्य अत्यतिष्ठद्दशांगुलं तन्मात्राणि पंच वै समष्टिरू
पं हिरण्यगर्भे पंचीकृतं पंचमहाभूतसमष्टिरूपं विराड्रूपं चोभयात्मकं दशांगुलं अति अतीत्यासंगो विकारैर्नंते सत्यस्
वसंविन्मात्रेकरसे स्वे महिम्नि अतिष्ठत् स्थितवान् अथवा भावाचृवृत्तिः भूतपंचकं सहकारणेन तु तत्पंचैतद्दशांगुलं दश
पर्वीत्मकमतीत्य व्याप्य स्थितवान् अथवा दशेंद्रियाणि दशदिशो वेत्यवमारीतिर्दशात्मकानि सर्वाण्यंगुलेपरिमाणोप
लक्षितानि परिच्छिन्नानि यानि तान्यतीत्य स्थितवानिति वा अथवा भौतिकं सर्वं मूर्तं बहिरंतश्च तद्दशांगुलमति
अतीत्य व्याप्य भूतभौतिकं सर्वमपेक्ष्य दशांगुलं दशगुणमतिरिच्य स्थितवान् निरवयवस्य महत्त्वं तं मन्त्रे तु यावर्
१४ स भूमिं विश्वतो वृत्वेति पुरुषस्य व्याप्तत्वेनोक्ते अत्यतिष्ठद्दशांगुलमित्यनेन विशेषत्वेन चोक्तं [illegible] सर्वे पुरु

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलम्॥ १४ पुरुष एवेदं
सर्वं यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति १५ ॥ ॥ ॥ ॥ ॥

यावद्यावित्सर्वं तत्तन्निरूप्यमाणे सर्वकल्पनाधिष्ठानं पुरुषमात्रमेवेत्याह पुरुष एवेदं सर्वमिति विमतं तावत्परि
च्छिन्नत्वात्संहतत्वाच्च पुरुषव्यतिरिक्तं रज्जुसर्पादिवदविद्यात्मकमेवेत्युक्ते इदमिति दृश्यत्वाद्रज्जुसर्पादिवदविद्यात्मक
मेवेत्युक्ते यद्भूतं यच्च भव्यमिति भूतभाविवर्तमानात्मकत्वात्त्रयं प्रपंचं च वृद्धविद्यात्मकमेवेत्युक्ते ततोऽविद्यात्मकप्रपंचे
निरूप्यमाणे सर्वकल्पनाधिष्ठानं पुरुषमात्रमेवेत्याह पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यमिति उतामृतत्वस्येशानः उ
तापि अमृतत्वस्य प्रतिभासमात्रसंसारतत्कारणनिवृत्तिलक्षणस्य मोक्षस्येशानः महावाक्यजनिताहं ब्रह्मास्मीति सम्य
ग्ज्ञानफलकारुङः सम्यक्स्वसंविन्मात्रवपुरिष्टोऽविद्यातत्कार्यसंसारभ्रमनिवृत्तिकर्ताहं अमृतत्वस्येशानः इत्युच्यते य
दन्नेनातिरोहति यत्तद्दृश्यजातं अन्नम् अद्यते भक्ष्यते सम्यग्ज्ञानेनेत्यन्नं मायया तेन मायाख्येनान्नेन अति अतीत्य वस्तु
स्वभावमतिलंघ्यातितीयवस्तुविपरीतरूपेणारोहति जायते तस्यापि कार्यजातस्य सत्तास्फुरणप्रदत्त्वेनाधिष्ठानत्वादीश्व
मानियंता परमेश्वर एव अथवा यत्पुरुषतत्त्वं मायाख्येनान्नेनातिरस्कविपरीतविपर्यादिकार्यरूपेणारोहति जायते स एवामृ

सेनः कारणं बुद्धिरवैकल्प्यानस्य तस्य लभो यस्य चेश्वरत्वं प्रशान्तेस्याह महानिति महान् देशकालाद्यनवच्छिन्नः प्रभुः जगदुत्पत्ति
प्रवेशस्थितिनियमनसंहारसमर्थः वै प्रसिद्धो पुरुषः पुरिशयनो पुरुषः स्वभक्तान्स्वाराधनेन यागादीनुपासनादीन्वा चेकार
यितान्तेषां सत्त्वस्यान्तःकरणस्य वैमल्यापादनेन श्रवणमननादिषु प्रवर्तक एषः सुनिर्मला
मविद्यादिमलरहितामिमां प्राप्तिं ज्ञातव्यादिसर्वसंसारकारणदशमरूपां निरतिशयानन्दाविर्भाव
लक्षणामपवर्गाख्यां प्रतीशानः मुमुक्षोः स्वरूपत्वेन तस्याविर्भावरूपत्वेव मोक्षत्वात्सम्यग्ज्ञानप्रमेयः प्रसादयेत्यर्थः सर्व
सर्वसंसारकारणं तद्भूतास्तस्येशानस्यैश्वर्येण ज्योतिरव्ययः ज्योतिः स्वयंप्रकाशः चिन्मात्रवपुरव्ययः कूटस्थनित्यः १२
परमेश्वरस्यैव सर्वान्तःकरणेषु प्राणिष्वनुप्रवेशाद्विबन्धनेन जीवत्वं सम्यग्ज्ञानेन जीवभावव्युदासेन निजरूपेणाविर्भावं चाह ॥
अङ्गुष्ठमात्र इति अङ्गुष्ठमात्रः स्वस्याङ्गुष्ठमात्रपरिमिते हृदये सोपलब्धेरङ्गुष्ठमात्रः पुरुषः पूर्णत्वात्पुरिशयनाद्वा पुरुषः
अन्तरात्मा सर्वादिहृदुपुरुषाद्यन्तःस्वरूपत्वान्तरात्मा सर्वोपाधीनां स्वरूपत्वादन्तरात्मा सदा जनानामिति यस्य कर्मा

महान्प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः सुनिर्मलामिमां प्राप्तिमीशानो ज्योतिरव्ययः १२ अङ्गुष्ठमात्रः पुरुषो
ऽन्तरात्मा सदा जनानां हृदये संनिविष्टः हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति ॥ १३॥

जीवत्वसंबन्धः जनानां जननादिधर्मवतामुपाधीनां सदान्तरात्मा जनानां सदा हृदये संनिविष्टस्तिष्ठति च अङ्गुष्ठमात्रत्वं न
स्वतः किं त्वङ्गुष्ठपरिमाणहृदयावच्छिन्नत्वादात्मनो अङ्गुष्ठमात्रत्वमित्याह हृदये संनिविष्टमिति सम्यक् निविष्टः संनिविष्टः
हृदयावच्छिन्नस्य परमेश्वरस्य स्वरूपानन्दस्फुरणप्रवेशेन निविष्टत्वात् हृदये संनिविष्टः हृदा हृदयस्थया बुद्ध्या मनीषा मनसा ईष्ट
स्वप्नमेव मनीषया मनीषा हृदा मनसा संकल्पात्मकेनाभिक्लृप्तोऽभिप्रकाशितः मनसा संकल्पितो बुद्ध्या निश्चित
स्तिमनसानुसन्धाभिप्रकाशितः स्फुटतं स्मृत्या वा हृदा मनीषा हृदा मनसा हृदा नेति नेतीत्यादिसर्वप्रतिषेधोपदेशेन मनीषा
विचारेणात्मानात्मविवेकविषयेण मनसा तदुभयजनितसम्यग्ज्ञानाभिक्लृप्तोऽभिप्रकाशितः ये शमादिसाधनसंपन्नाः
एतन्प्रत्यक्षं सम्यग्ज्ञानेन नान्तरीयकतया श्रविद्यातत्कार्योपाधिप्रविलापनं विदुरपरोक्षीकुर्युस्ते सम्यग्दर्शिनो अमृता
भवन्ति जन्ममरणादिसंसारभ्रमहेतुरविद्यावोधाद्यमृता भवन्तीत्युच्यते १३

अद्वितीयत्वं चाह । अपाणिपाद इति । निर्विशेषस्यात्मनः स्वं स पाणिपादः पाणिपादाद्यस्य न विद्यंते स्यपाणिपादः तथापि जवनः सर्वगामी च ग्रहीता गृहीतं ते सर्वात्मत्वेन तत्र तत्र गच्छतीव भातीवि जवनः ईश्वरसत्ताव्यतिरेकेण सर्वस्य सत्ताभावात्त्वावि धार्यस्थितस्य सत्तापूरत्वेन सर्वस्य ग्राहकश्चातः ग्रहीता चेतरवत् इंद्रियाणामनुपलक्षणमेतत् पश्यत्यचक्षुः स्वयं चक्षुर्मन्याविच्छुरत्तमिति तद्विषयं स्वरूपानुभवेन पश्यति सशृणोत्यकर्णः स्वतः श्रोत्रहीनोपि श्रोत्रेत्तरहितो धियास्वरूपानुभवेन शृणोतीत्युच्यते इतरेंद्रियाणामप्युपलक्षणमेतत् स वेत्ति वेद्यं किं बहुना सर्वं स्वयंप्रकाशः चिद्रूपः सः परमात्मा वेत्ति जानाति वेद्यं वेदनार्हं तत्तद्विशेषरूपं सर्वं स्वसन्निधिमात्रेण जानाति ग्राहकत्वेन प्रसिद्धः ननु चक्षुरादीनामप्यन्यो ग्राहकः स्यात्तस्याप्यन्यो ग्राहकः एवं च तस्याप्यन्यस्तस्याप्यन्य इत्यनवस्था स्यादित्यतो न किंचिन्निमित्तेंद्रियादिसापेक्षमस्य ग्राहिनां ग्राहकत्वान्यग्राहकांतरापेक्षा किं तु उपलब्धिरूपस्य तु स्वयंप्रकाशचिद्रूपस्य सत्तासर्वसाक्षित्वाच्च न तस्य ग्राहकोन्तरापेक्षेत्याह न च तस्यास्ति वेत्तेति तं ब्रह्मविदः सर्वज्ञमग्र्यमग्रे भवं सर्वाधिष्ठानत्वेन सर्वकारणत्वेन च सर्वजगतः पूर्वसिद्धं कालतो देशतोऽनवच्छिन्नमिति यावत् सर्वेषां प्रधानं वा पुरुषं पूर्णं पुरिशयनाद्वा हेतुतः पूर्णत्वात्पुरुषं महांतं व्याप्तिमत्त्ववत्त्व

अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महांतम् ॥१९॥

२० अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जंतोः तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं

भावाद्वस्तुतोऽनवच्छिन्नमित्यमाहुर्वेदांताः ब्रह्मविदः ॥१९॥ परमात्मनोऽद्वितीयत्वं प्रत्यक्त्वेनावस्थानमेकत्वेनानात्मत्वं ज्ञानाधिकारित्वं चाह अणोरणीयानिति अणोः सूक्ष्मात् श्यामाकादेरपि सूक्ष्मतरः महतो महीयान् महतः आकाशादेरपि महत्तरः अद्वितीयोऽणिमस्वरूपः आत्मा यच्चाप्नोतीति यदादत्ते यच्चात्ति विषयानिह यच्चास्य संततो भावस्तस्मादात्मा गुहायां हृदये सूक्ष्मशरीरस्य गुहायां निहितः निविष्टः प्रत्यक्त्वेनावस्थितः स्थितस्वरूपः अस्य चक्षुरादिकरणग्राह्यत्वेन संनिहितस्य जंतोर्जननधर्मयुक्तस्य स्थूलशरीरस्य गुहायामित्यन्वयः तं प्रत्यगात्मानमक्रतुं विषयभोगसंकल्परहितं स्वतोऽसंसारिणमित्यर्थः पश्यत्यपरोक्षीकरोति केन हेणमहिमानं निरवग्रहमहत्त्वं ब्रह्मशब्दवाच्यमिति यावत् ईशं सर्वेशं निरपेक्षं तु परात्परभूतं प्रत्यगात्मानं तत्परात्परभूतमद्वितीयत्वेन यदा पश्यति तदा वीतशोकः शोकादिसंसारधर्मशून्यो भवतीत्यर्थः कुतः साधनेन पश्यतीत्याह धातुः प्रसादात् जातावेकवचनं इंद्रियाणि धातवः शरीरस्य धारणात् तेषां प्रसादाद्विषयरूपदुरंतनानात्मध्यानेस्ते षामनाक्षिप्यमाणत्वेन तेषामानसः प्रत्यक्प्रवणत्वलक्षणात्प्रसादात्पश्यति ॥२०॥

स्वमाययाधिदैविकोपाधीन्समष्टिरूपान्सृष्ट्वा तेष्वनुप्रविश्याग्न्यादित्यादिव्याख्याल व्यास्थितोपीश्वर एवेत्याह तदेवाग्निरिति तदेवेश्वर
तत्त्वं अग्निसूर्यवायुचंद्रादिरूपेणापि स्थितं उ अपि सर्वत्रान्वयो द्रष्टव्यः तदेव शुक्रं रोचिष्णु नक्षत्रमंडलं तेन रूपेणापि स्थितं ब्र
ह्मेति पाठे विराड्रूपेणापि तदेवास्थितमिति द्रष्टव्यः तद्ब्रह्म हिरण्यगर्भरूपेणापि तदेवास्थितं तदापः अपामभिमानि देवतारूपे
णापि तदेवास्थितं तत्प्रजापतिर्हिरण्यगर्भरूपेणापि चतुर्मुखविग्रहेण तदेवास्थितं एष ब्रह्मैष इंद्र एष प्रजापतिरेते सर्वे देवा इत्या
दिश्रुतेः तत्राग्निर्वाक्समष्टिः आदित्यश्चक्षुःसमष्टिः वायुः प्राणः समष्टिः चंद्रमा मनःसमष्टिः शुक्रं विराट् स्थूलसम
ष्टिः ब्रह्म हिरण्यगर्भः अंतःकरणसमष्टिः आपो जिह्वेन्द्रियसमष्टिः प्रजापतिरुपस्थेन्द्रियसमष्टिः एतदग्न्यादिसमष्टिग्रहणमित
रसमष्टीनामप्युपलक्षणं द्रष्टव्यं ॥२॥ स्वमाययात्मा व्यष्टिभूतान्निखिलकार्यकरणोपाधीन्सृष्ट्वा तेषु घटे आकाश
वज्जले चंद्रवच्च प्रविश्य तत्तदाख्यालव्यास्थितोपीश्वर एवेत्याह त्वमिति त्वमेव स्त्रीपुंसकरूपेणावस्थितः सन्तत्तदाख्याल

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चंद्रमाः तदेव शुक्रं तद्ब्रह्म तदापस्तत्प्रजापतिः २ त्वं स्त्री त्वं पुमानसि त्वं कुमार
उत वा कुमारी त्वं जीर्णो दंडेन वंचसि त्वं जातो भवसि विश्वतोमुखः ३ नीलः पतंगो हरितो लोहिताक्षस्तडिद्गर्भ
ऋतवः समुद्राः अनादिमत्त्वं विभुत्वेन वर्तसे यतो जातानि भुवनानि विश्वा ४ ॥ः॥

भवसि उत वा कुमारकुमारीरूपेणावस्थितोसि जीर्णः परिणतवयाः वलिपलिताकुलितः सन्करकलितेन दंडेनावलंबी भू
त्वेनेतस्ततः परिभ्रमन् वंचसि त्वमेव च किंपरिमितगुणेन न त्वमेव त्वं विश्वतोमुखः सर्वतोमुखः जातोसि हे परमेश्वर त्वमेव स्वे
च्छया नानाविकारेण मायया जातो ह वलत्यसृत्यर्थः ३ तिर्यगादिरूपेणापीश्वरस्यैवावस्थानमाह एवं मायया तिर्यक्कार्यक
रणानि सृष्ट्वा तेष्वनुप्रविश्य अयःपिंडानुगतवह्निवत्तद्रूपं भजित्वावस्थितस्त्वमेवेत्याह नीलइति नीलः पतंग नीलः भ्रमः प
तंगः पक्षी भ्रमरादिः सोपि त्वमेव हरितः शुकादिः सोपि त्वमेव लोहिताक्षः पक्षी सोपि त्वमेव तडिद्गर्भो मेघः सोपि त्वमेव ऋतवो व
संतादयः षट् तेपि त्वमेव समुद्रा लवणादयः सप्त तेपि त्वमेव आदिमन्न भवतीत्यनादिमत्कालतोऽनवच्छिन्नमित्यर्थः तदपि
त्वमेव त्वमिति सर्वत्र संबध्यते विभुत्वेन इत्थंभावे तृतीया देशतोऽनवच्छिन्नत्वेनापि त्वमेव वर्तसे विभुत्वेन वर्तमानं यत्तदपि
त्वमेव यतो जातानि भुवनानि विश्वा यतो यस्माज्जातानि उत्पन्नानि भुवनानि भूरादीनि विश्वा विश्वानि समस्तानि भुवना
नि तत्त्वमेव नीलादिरूपेण वर्तस इत्यन्वयः ४

उक्तमर्थं दृढीकर्तुं मंत्रदृगनुभवमाह वेदेति वेदजानेऽहमेतं प्रत्यक्षमाचार्यपरंपरातः एनं चैतन्यमात्मानं प्रतीयातीतम् अजरमेव अ-
परिणतं पुराणं पुरापि नव इति पुराणं जन्मादिरहितं अजरं पुराणं कूटस्थनित्यमिति यावत् सर्वात्मानं सर्वेषामात्मानं सर्वेषामा-
त्मानं सर्वेषामात्मा स्वरूपमिति वा सर्वात्मा वस्तुतोऽनवच्छिन्नत्वमिति यावत् सर्वात्मानं सर्वगतं सर्वव्यापिनं व्यापित्वं तं
भवति किं हेतुकं तत्कार्यमित्याह विभुत्वादिति आकाशादिविविधकार्यरूपेण भवतीति विभुः तस्मात्सर्वगतमित्यर्थः जन्मनिरोधं
प्रवदन्ति यस्य जगज्जन्म जगन्निरोधं संहृतं यस्य परमेश्वरस्य कर्मेति ब्रह्मवादिनस्तत्त्वदर्शिनः प्रसिद्धौ प्रवदन्ति नित्यं महा-
प्रलये महासर्गे आवांतरप्रलयावांतरसर्गेषु सुषुप्तिप्रलयप्रबोधमध्ये च यस्य वा जन्मनिरोधं जन्मनो निरोधं अभावं
प्रवदन्तीति नित्यमहं वेदेत्यन्वयः सम्यग्ज्ञानप्रतिपादित्वमस्येत्यभिप्रायः ॥ २१ ॥ इति श्रीमत्परमहंसपरिव्राजकश्रीमच्छंकरभगवत्पूज्यपाद-
शिष्यस्य विज्ञानात्मभगवतः कृतौ श्वेताश्वतरोपनिषद्विवरणे तृतीयोऽध्यायः ॥ ३ ॥ उक्तं पूर्वाध्याये बुद्धि(?)प्रयोजनमाश्रित्य
अमितिन्यायात् अभ्यासस्य तात्पर्यलिंगत्वात् परमेश्वरस्य पुनः पुनः प्रतिपादनेन चतुर्थाध्यायेऽपि परमेश्वरात्सम्य-
ग्ज्ञानप्रार्थनेन तत्त्वंपदार्थशोधनमुखेन तत्त्वप्रतिपादनेन तस्य मायायाः प्रतिकूलत्वदर्शनेन मिथ्यात्वं व्यावर्णयिष्यमाणस्यादौ इति

वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वगतं विभुत्वात् जन्मनिरोधं प्रवदन्ति यस्य ब्रह्मवादिनो हि प्रवदन्ति नित्यं ॥ २१ ॥ इति श्वे-
ताश्वतरोपनिषदि तृतीयोऽध्यायः ॥ ३ ॥ य एकोऽवर्णो बहुधा शक्तियोगाद्वर्णाननेकान्निहितार्थो दधाति वि चैति चान्ते विश्वमादौ

पत्वप्रतिपादनेन सम्यग्ज्ञानमोक्षसाधनं प्रवर्तयितुं तेन प्रत्यगात्मा वदीप्यस्य स्वरूपप्रतिपादनं ॥ स देवः स नो बुद्ध्या शुभया संयुनक्तु ॥ १ ॥

मुमुक्षोः परमेश्वरात्सम्यग्ज्ञानप्रार्थनमाह य इति यः स्वयं प्रकृत्या विशेषः एकः अद्वितीयः अवर्णः वर्ण्यतेऽनेनेति वर्णो नाम जाति-
र्मनस्या वर्ण्यते इति वर्णो रूपं तेन रहितो नामरूपप्रपञ्चरहितः बहुधा शक्तियोगात् बहुप्रकारकार्यविषयमायाशक्तियोगात्
वर्ण्यतेऽनेनेति वर्णाः रूपाणि वर्णान् अनेकान् अनेकप्रकारान् अनेकान् निहितार्थो यावन्ति निहितानि यस्य स्वभावविषय-
त्वेन निहितः निहितार्थः अर्थ्यते स्वयमभिधेयं रूपं अर्थ्यतेऽनेनेत्यर्थोऽभिधानं निहितार्थो दधाति करोति सर्वदा नामरूप-
आत्मकं जगत् दधाति करोतीत्यर्थः वि चैति चान्ते विश्वमन्ते प्रलयकाले वेति वि एति च अन्ते एव विश्वमादौ विगमयति विश्वं च
तिसर्वस्वात्मन्युपसंहरति च आदौ विश्वं स्वस्मात् धातीत्यनेन एव स्वयं धत्ते चकारस्यापितत्वं सं बोध्यं स देवः स नो बुद्ध्या शुभया संयुनक्तु
जगदुत्पत्तिस्थितिप्रलयकारणत्वधर्मत्वेनलक्षितो यः स देवो द्योतनस्वभावः स्वयंप्रकाशाद्वितीयचैतन्यरस इति यावत् स नो बुद्ध्या शु-
भया संयुनक्तु सः एव देवः नोऽस्मान् नित्यानित्यवस्तुविवेकेहामुत्रार्थभोगविरागशमदमादिसाधनकलापसमुपेतानस्मान् साधनचतुष्ट-

प्रत्यस्तादिसमस्तनिर्विशेषसुखसंविद्रूपात्मा अखण्डाद्वितीयोपाधौ जले भानुरिव तदनुप्रविश्य तदुपाधिपरिकल्पितविंबप्रतिविंबभेदंगत्वा
विंबरूपेण संसारदोषानास्पृष्टः स्वयंप्रकाशानवच्छिन्नस्वरूपसंविदा सर्वज्ञतया वर्तते यस्य विंबभूतभास्कर इव जलादिधर्म
स्यनिर्लेपप्रकाशस्वरूपेण सर्वप्रकाशकत्वेन च वर्तते यथा तदुपाधिभूताविद्याप्रतिपादितप्रतिबिंबस्वरूपेणोपाधिधर्मैः स्वधर्म
त्वेन स्वीकृत्य पापादिमलकलुषितत्वात्तस्य लेपो रूपत्वेन संसारीव वर्तते रविर्वा स्वच्छपात्रस्थोपाधिप्रतिपादिततत्प्रतिबिंब
रूपेण तद्धर्मैश्चलनादिभिरन्यस्य कलुषितत्वेन वर्तते यथा तद्वदित्याह ॥ द्वाविति ॥ द्वौ घटाकाशमहाकाशस्थानीयौ जीव
परमात्मानौ सुपर्णा सुपर्णौ शोभनपतनौ शोभनगमनौ सयुजा सयुजौ विंबप्रतिविंबभावेन सदा संयुक्तौ सखाया सखायौ
नित्योपकार्योपकारकत्वेन वर्तेते सखायौ समानाख्यौ समानाभिव्यक्तिकारणौ वा चेतनत्वादिना समानाख्यौ वा समा
नं अनंतसुखहेतुभूतात्मनो विंबप्रतिबिंबभेदोपाधिकृत्वेन किंचिज्ज्ञत्वसर्वज्ञत्वोपाधिकत्वेन नियम्यनियंतृत्वोपाधिकत्वेन
अज्ञत्वाज्ञौपाधिकत्वेन च समानं प्रकृतिप्राकृतं देहमुच्छेदधर्मं वृक्षं वृक्षवदाध्यात्मादिभिरभिन्नत्वाद्वृक्षशाखत्वात्पुण्यपापा

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति ॥ समाने वृ

दि बहुबीजत्वात्सुखदुःखादिबहुफलत्वाच्च वृक्षं परिषस्वजाते परिष्वक्तवंतौ परिगृह्य वर्तेते नियम्य हे पुरुषो व्यत्वात्तदुपाधि
त्वेन चेमं वृक्षं परिगृह्य वर्तेते तयोः कार्यकारणोपाधिकयोर्जीवेश्वरयोर्मध्ये अन्यो मायाकार्याहंकाराद्यलिंगशरीराभिमा
नी जीवः पिप्पलं कर्मनिष्पन्नं सुखदुःखलक्षणं फलं स्वादु विविधविचित्रविषयास्वादनं विषयवासनावासनानिमित्त
त्यर्थः अत्ति उपभुंक्ते अनश्नन्नन्यः प्रकृत्याख्यमायोपाधिको विंबस्थानीय ईश्वरः कार्योपाधिकात्स्वप्रतिबिंबजीवादन्यः
अनश्नन्कर्मफलमनुपभुंजानः अभिचाकशीति सर्वमविद्धतः सन्नभितः पश्यन्सर्वसंसारधर्मं अन्यः स्वयंप्रकाशत्व
ऽज्ञप्तिमात्ररूपेणास्त इति यावत् स्वस्य विंबभूतादित्यः जलधर्मं अन्यः स्वप्रकाशरूपेण सर्वं प्रकाशयन्नास्ते यथा तद्वत्
एष एव प्रविष्टः आनखाग्रेभ्यः रूपं रूपं प्रतिरूपो बभूवेत्यादिश्रुत्यंतरात् ॥ जीवस्वरूपं परमात्मस्वरूपं चानुरूपं जीवस्य परमात्मै
कत्वज्ञानान्मोक्ष इति सिद्धिमाह समाने वृक्ष इति पुण्यपापफलभोगायतनत्वेन समाने वृक्षे शरीरे देहस्य जननिर्वचनादुच्छेदात्म
के विद्यातत्कार्यान्नमयादिपंचकोशात्मके पुरुषः पूर्णत्वात्पुरुषः परमेश्वरः ॥

यतो जातानि भुवनानि तत्पित्तमेवेति वा सर्वोपाधिरहितत्वात्स्वरूपतोऽप्यनवच्छिन्नं अनादिमदिति कालतोऽप्यानन्त्यमुक्तं विमुक्तत्वेनेति देशतो
प्यानन्त्यं यतः प्रतिस्वरूपानन्त्यमिदानीं तेजोवन्नलक्षणां प्रकृतिं ध्यानयोग्यां प्रतिपादयितुं निखिलप्रपञ्चस्य तादृग्वर्तित्वात् ईश्वराभिन्नप्रकृतिवि
वर्तरूपशब्दादिषु विषयेषु संयोगात्मनस्तस्याः संसारकारणत्वात्तन्निवृत्तेर्मोक्षहेतुत्वं चाह अजामिति अजां न जायत इत्यजां मू
लप्रकृतित्वाज्जन्मरहितामित्यर्थः सर्वव्याप्यखण्डात्मकत्वादेकां लोहितशुक्लकृष्णां तेजः सृष्टात्तद्रव्यापन्नत्वाल्लोहितां अ
पः सृष्टा तद्रव्यापन्नत्वाच्छुक्लां अन्नशब्दवाच्यां पृथ्वीं सृष्टा तद्रव्यापन्नत्वात्कृष्णां यथवा लोहितां रजःशक्तिकां शु
क्लां सत्त्वशक्तिकां कृष्णां तमःशक्तिकां एवं लोहितशुक्लकृष्णां पुनरपि तामेव विशिनष्टि बह्वीरिति बह्वीरनेका विभक्ता वा
विरूपाः प्रजाः प्रविभक्तरूपेण जायन्ते इति प्रजाः कारणात्मत्वेनाविद्यमानस्यासत्तो जन्मासंभवादुत्पत्तेः प्रागविद्यमानं न जायते
किं तर्हि कारणात्मना विद्यमानमेव प्रविभक्तरूपेण व्यज्यते अतः प्रजा इत्युक्ताः सृजमानामुत्पादयन्तीं सरूपाः स्वेन लोहितशु
क्लकृष्णात्मत्वेन समानरूपाः सत्त्वरजस्तमआत्मकत्वेन वा समानरूपाः सृजमानामित्यन्वयः अजो जन्मरहितः हि यस्मादेकः अ

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ५

नादिकालप्रवृत्ताविद्याकामकर्मपाशितः तेजोऽबन्नात्मकप्रकृतेर्विवर्तत्वात्स्वस्य तत्त्वात्मकत्वाच्छब्दादिविषयावस्थापन्नां प्रकृतिं जु
षमाणः सेवमानः तन्निमित्तभोगेषु प्रियमाणोऽनुशेते स्वयमविकार्यः असंगसुखसंविन्मात्रैकरसः परमात्मरूपः स्वतः सर्वसं
सारधर्मानास्कन्दितः प्रकृतेस्तद्विवर्तानामन्नमयादिपञ्चकोशेषु जलेचन्द्रवदनुप्रविश्य तद्धर्मान्स्वधर्मत्वेन स्वीकृत्य प्रकृतिप्रवृत्तान्यो
नुसृत्यानुशेतेऽनुवर्तते जहाति त्यजति नाशयति अधर्मं त्यजतीति वा सम्यग्ज्ञानेन चिन्मात्रतया वाधतु एनां सर्वस्य मूलकारणभूतां
मायारूपां प्रकृतिं भुक्तभोगां भुक्तः संसारभोगो यया सा भुक्तभोगा तां विकारित्वादियमेव संसारभोगकर्त्री आत्मा निःसंगसुखसंविन्मा
त्रैकरसत्वात्तन्न भोगकर्ता चलनादिधर्मश्चात्मप्रत्यक्षः जिज्वलनादिधर्मयुक्तमुल्कचलनाद्यारोपणनिमित्तयथा तत्ववत्संसारधर्मा
त्वं इति असंगोऽनन्तसुखसंविन्मात्रैकरसे आत्मनि स्वाध्यस्तासत्ती सर्वसंसारधर्मारोपणनिमित्तमज्ञानमनर्थरूपं अतस्तां संसारा
रोपणनिमित्तां अनर्थरूपां सम्यग्ज्ञानेन नाशयत्यतः परमात्मरूपत्वान्न जायत इत्यजः अन्यः प्रकृतितद्विकारसाक्षित्वात्ताभ्योऽन्यः
अहं ब्रह्मास्मीत्यपरोक्षीकृततत्त्वो मुमुक्षुरिति तदधिकारामेहाभिमानिनश्च ज्ञानिनोऽन्यः अहं ब्रह्मास्मीत्येकत्वापरोक्षेण विद्वान्मूलप्रकृ
तिं स्वतत्त्वमात्रतया हन्तीत्यर्थः ५

श्वे

पादस्पर्शमात्रेण पदस्तद्विदः यत्र गायत्र्युपदिष्टं धर्मोपासनाद्यनुष्ठीयन्ते मुमुक्षुभिः करणैः साधुश्चानुष्ठेयसंपत्त्या गायत्र्युपदि
ष्टश्रवणाद्यनुष्ठायकस्य शास्त्रोपदिष्टप्रकारेणैव कृतस्य सर्वस्याप्यपरब्रह्मात्मत्वेन विदुषस्तद्वेदिनो विदुषस्तत्र तेषु संस्कारसमासने प्रवर्तते
साधनानुष्ठायिन इमे अहं ब्रह्मास्मीत्यपरोक्षीकृते कृताः संतः समासते उत्तमसाधनपरं पदं परमात्माहं ब्रह्मास्मीत्येकत्वद
र्शनेन ध्वस्तसंसारकारणाः स्वस्वरूपत्वेनाविर्भूतनिरतिशयानन्दस्वात्मानं ते एवं मन्ता भवन्ति। सम्यग्ज्ञानं नाम देवः परमेश्व
रः स्वमायया शक्त्या पुरुषार्थसाधनश्रुतिपादकानां वेदानां स्मृतीनां यथायोगं दीक्षां तत्साध्यं भूतं भविष्यद्वर्तमानं स्मैतत्प्रपञ्चजा
तं च सृष्ट्वा स्वमायाशक्तिविवर्तमसमष्टिव्यष्ट्यात्मके कार्यकारणात्मके पाथोजले चन्द्रवज्जुष्टं विश्वं यथा विधा कामनस्मि हितिविद
सन्नजीवाख्यालभत इत्याह छन्दांसीति ऋग्यजुःसामाथर्वाङ्गिरसाख्या वेदाः यज्ञाः देवपूजाद्यो दानपर्यन्ताः क्रतवो ज्योतिष्टो
मादयः अथवा यूपसंबन्धरहिताः विहितक्रियायज्ञाः तत्संबन्धी क्रियाः क्रतवो व्रतानि चान्द्रायणपयःपानादियमनियमादि

छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः ९

भूतमतीतं भव्यं भविष्यत् यच्चान्यदपि वर्तमानं वेदा वदन्ति यज्ञादिसाध्यत्वेन भूतभविष्यद्वर्तमानरूपेणावस्थितं प्रपञ्चमुच्यते भिन्न
पं वेदा एव प्रमाणमिति यावत् यच्छब्दस्य सर्वेष्वनुषङ्गः एकैकं संबन्धोऽद्रष्टव्यः अस्मात्प्रकृतात् अक्षराख्यात् ब्रह्मणः एतत्सर्वमुक्तं समुत्प
द्यते इत्यध्याहृत्य योजयितव्यं कथं कूटस्थस्य ब्रह्मणो जगदुत्पादनत्वमित्याशङ्कायामाह मायी सृजते विश्वमिति कूटस्थस्यापि
मायोपाधिकत्वात् स्वमायाशक्तिवशात् सर्वस्रष्टृत्वमुपपन्नमिति यावत् एतदित्यस्मादित्यनेनान्वयोऽपि तस्मिन्समष्टिव्यष्टि
कार्यकारणात्मके विश्वप्रपञ्चे स एव मायया सन्निरुद्धः मायया निर्मिते तस्मिन्मायया संनिरुद्धो बद्धो मायया अन्यः सन्परिवर्तते मायी
मायोपाधिकः सन्नेतत्सर्वोक्तं विश्वं सृजत इति वेदा वदन्ति अस्माद्ब्रह्मणो मायया अन्यः संस्तस्मिन्संनिरुद्धो बद्ध इति व्यवहितेना
न्वयो वा ९ पदे पदे उक्ता या जगत्सृष्टिर्मायायत्तेति तद्विशदयितुं अनन्तसुखचिन्मात्रस्य परमेश्वरस्य निजरूपत्वं प्रकृतिं भूतमायायं
तदेकदेशोऽस्य कार्यं तेन सर्वस्य व्याप्यत्वं मायाधिष्ठानभूतानन्तसुखचिन्मात्रपरमेश्वरेण तदेकदेशेऽस्याधिष्ठितत्वेन सर्वस्य
व्याप्यत्वं चाह॥ ॥ ॥ ॥॥

निमग्नश्चस्तन्नाघनेच धर्मवृक्षे जले चंडवैमग्नः प्रतिविंबितः निमग्नो नितरां मग्नोऽविद्यातत्कार्यान्वयमयादिपंचकोशेषु तत्कर्मेषु चास्मि
माभिमानमपाशयाशीत्त्वेन नितरां मग्नः अनीशया शोचति मुह्यमानः मोहस्याविद्यात्तिरस्कृतप्रमाणः संविदानंदाद्वितीयब्रह्म
रूपनिजस्वरूपत्तः अनीशया परमार्थतः स्वपंसर्वसंसारधर्मानास्पृष्टत्वेऽप्यहमेवसन्नविद्यात्रान्तोऽहं रमावेत्ताहं कर्ताहं भोक्ताहं सुखी
दुःखी संसारी चेत्यनीश्वरत्तया शोचति संसारशोकमनुभवति जुष्टं यदा पश्यति जुष्टं हिरण्यगर्भादिभिः सेवितं सनकादियोगिभि
श्च सेवितं अखंडसुखस्वरूपत्वात्प्रियतमं चान्यं जीवादन्यं यदा तिमग्नहीतमद्वितीयं निःसंगसुखबोधवपुष्ट्वेन परमार्थतः प्रवृ
त्तिशान्तेभ्योऽन्यमिति वा ईशमीश्वरं मत्काशाविंबादित्यस्थानीयमस्य यदाकाशप्रतिविंबादित्यस्थानीयस्य प्रत्यगात्मनो म
महिमानं अनवछिन्नसुखबोधवपुरीश्वर एव निजमहिमेति यदा पश्यति यदा साधनचतुष्टयसंपन्नो गुरुसन्निधौ यथा
वच्छ्रवणमनननिदिध्यासनान्यभ्यस्य पश्यत्यपरोक्षीकरोति यदेति वचनात् तदेत्यध्याहर्तव्यं तदा वीतशोकः सर्वैकं चाप

निमग्नोऽनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ७ ऋचोऽक्षरे प
रमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥८॥ ॐ ॥ ह्र

रोहेण प्रवृत्तसंसारत्तारणेऽभवतीत्यर्थः ७ जीवेश्वरैकत्वज्ञानस्य पुनः प्रणवाभ्यासावन्यन्तकर्मोपासनानां साक्षात्साधनत्वं
णादीनां तत्प्रतिपादकवेदानामुपास्यत्वेन पश्चत्त्वेन ब्रह्मविद्योपकारकदेवानां चेश्वराधीनरूपत्वं ईश्वरे स्थितत्वमस्य रेकत्वा
नाद्युपपमसाध्यं वेदानां वेदपर्यायमेकत्वज्ञानान्मोक्षं चाह ऋचोऽक्षरे इति ऋच इति सर्ववेदोपलक्षणं ऋगादिसर्वे वेदाः अक्षरेण
क्षरतीत्यक्षरं सर्वमश्नुते इति वाऽक्षरं तस्मिन्नक्षरे परमे उत्कृष्टे वस्तुतोऽनवछिन्ने व्योम्नि आकाशे आकाशशब्दवाच्ये आकाशोप
मनामरूपयोर्निर्वहितारस्याकाशशब्दस्य परमात्मनि प्रयोगदर्शनात् अथवाऽसंगत्वाद्यविरोधेन सर्वान्तरत्वेन वर्तमान
त्वात् आकाशकल्ये निषेदुरिति संबंधः यस्मिन्सर्वोन्नतेऽक्षरे देवा हिरण्यगर्भादयः स्वमहिम्ना विश्वे तथ छिन्नताग्न्यादि
दयश्च सर्वे देवा अधि उपरि निषेदुः निषण्णा आश्रिताः स्तिष्ठंति यः ऋगादिप्रतिपादितकर्मोपासनाद्यनुष्ठाय तैः शुद्धां
तःकरणो भूत्वा पुनर्वेदगायत्र्याद्युपदिष्टशमदमाद्युपबृंहितश्रवणमनननिदिध्यासनान्यनुष्ठाय तद्ब्रह्माक्षरशब्दवाच्यं परं ब्र
ह्मात्मत्वेन न वेद पश्यत्सकृदभ्रवणात्तत्पदाध्याहर्तव्यः स किमृचा ऋचा साध्यैः तैः ऋगादिभिः किं प्रयोजनं करिष्यति नाति
किंचित्प्रयोजनं करिष्यतीत्यर्थः ॥ ॐ ॥

श्वे० उ०
२०

हिरण्यगर्भ इति प्रसादाभिमुखं परमेश्वरं प्रति सम्यग्ज्ञानं प्रार्थनमाह योदेवानामित्युक्तार्थो मंत्रः पश्यत अपश्यत यस्य येनात्मने पदं
वेल्लपहरस्य माऽपोगे ऽप भावः अवांतरसर्गस्थितिप्रलयकर्तृत्वेन देवप्रवर्तकत्वेन च निरीक्षणं तत्त्वानित्यर्थः विश्वाधिपो रु
द्र इत्येके पठंति १ भी हिरण्यगर्भादिदेवास्तु तिस्त्रामि त्वं भूरादिलोकानामाश्रयत्वं व्यष्टिजीवान्वृत्तिनियंतृत्वेश्वरः करणश्रुतिकारण
मस्य ज्ञानाधिकारसिद्ध्यर्थं मुमुक्षुभिराराध्यत्वं चेश्वरस्यैवाह योदेवानामिति यः प्रकृतः परमेश्वरो देवानां समष्टिरूपाणां देवानामधि
पः स्वामी समष्टिकार्योपाधिकानां हिरण्यगर्भादीनां प्रकृतिमूलकारणोपाधिक ईश्वरः स्वामी यस्मिन्परमेश्वरे सर्वकारणे लोका भूरा
दिलोकाः लोक्यंत इति लोकाः इत्यभूताः सर्वपदार्था वा अधिश्रिता ओतप्रोतत्वेनाधि उपरिस्थिताः यः कारणोपाधिकः परमेश्वरः
ईशे ईष्टे कालोपः छांदसः अस्य द्विपदः अस्य चतुष्पादभिमानिनो मनुष्यादेः चतुष्पदः अस्य चतुष्पादभिमानिनः पश्वादेश्च कस्मै क
यसुखरूपाय छांदसः कस्मै भावः देवाय द्योतनस्वभावाय यस्मात्सर्वं इत्सर्वमान्तेच्छ इत्यस्मान्नाहर्तव्यस्तस्मै सुखसंवित्स्वरूपायेत्यर्थः न
स्मा इति केचित्पठंति तस्मिन्पाठे तस्मै कस्मा एकस्वभावायेत्यर्थः हविषा तत्र राध्यते तत्साधनभूतद्रव्येण रूपरोडाशादि विधेम परि

योदेवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः हिरण्यगर्भं पश्यते जायमानं स नो बुद्ध्या शुभया संयुनक्तु १२ योदेवा
नामधिपो यस्मिँल्लोका अधिश्रिताः य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम १३ सूक्ष्मातिसूक्ष्मं कलिलस्य म
ध्ये विश्वस्य स्रष्टारमनेकरूपं विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शांतिमत्यंतमेति १४ चरेम विधेः परिचरणकर्मणा एत

द्रूपं १३ ईश्वरस्य परमसूक्ष्मत्वं संसारस्य कर्मध्ये साक्षित्वेनावस्थितत्वं सर्वजगत्स्रष्टृत्वं सर्वात्मकत्वमीश्वरैकत्वज्ञानान्मोक्षसिद्धि
चैतेनेत्यर्थजातमसकृदुक्तमपि ग्रंथलाघवाद्बुद्धिलाघवं प्रयोजनमपेक्षितव्यमितिन्यायमाश्रित्याह सूक्ष्मेति सूक्ष्मातिसूक्ष्मभूतानि
सूक्ष्माणि तेभ्य उत्तरोत्तरास्पूर्वं पूर्वं सूक्ष्मतेभ्यस्तन्मात्राणि सूक्ष्माणि तेभ्य उत्तरोत्तरास्पूर्वं पूर्वं सूक्ष्मतेभ्यो महत्तत्त्वं वाव्यक्तमीक्षण
सूक्ष्मतमा इत्यपि प्रकृतिः सूक्ष्मा प्रकृतेरपि च प्रकाशात्विशेषेश्वरः सवपुरीश्वरः सूक्ष्ममिति सूक्ष्मातिसूक्ष्मं कलिलस्य प्रकृति प्राकृता
त्मस्य संसारदुर्गस्य गहनस्य मध्ये तः साक्षित्वेनावस्थितं विश्वस्य स्रष्टारं विश्वस्य महत्तत्त्वमोक्तिकप्रपंचजातस्य स्रष्टारं तत्तच्छ्व
वान्यभूतमनेकरूपं नानाविधजलपात्रेषु चंद्र इव ब्रह्मादिपिपीलिकांतेषु समष्टिव्यष्टिरूपकार्यकारणोपाधिष्वनेकस्वरूपेणावभा
समानं विश्वस्य मायातद्विवर्तीभूतस्यैकमद्वितीयं परिवेष्टितारं स्वस्वरूपस्फुरणप्रदत्वेन परितोऽन्तर्बहिश्च वेष्टितारं शिवं निःसंगत्वा
त्स्ववृत्तिप्राबल्येनाश्वमलेनोऽसंकोचितानंतसुखचिन्मात्रस्वरूपं ज्ञात्वा अहं ब्रह्मास्मीत्यपरोक्षीकृत्य शांतिमत्यंतमेति व्याख्यातमेतत्

वीक्षे यास्यल्पप्रकृतिं मायां विषयाद्यवान्तरप्रकृतीश्चाधितिष्ठति सत्तास्फुरणप्रदत्वेनाधिष्ठाय तिष्ठति अथवा यो
निं योनिं १०

मायामिति तत्र तत्र जगत्प्रकृतित्वेनोक्तां यां तां मायां विद्यात् विजानीयात् तुशब्दोऽवधारणे तत्र तत्रेश्वरत्वेन य उक्तस्तं महेश्वरं
महांश्चासावीश्वरश्चेति महेश्वरस्तं अद्वितीयस्तु स्वच्छचिन्मात्रवपुरीश्वरं मायिनं मायायाः स्वरूपस्फुरणप्रदत्तया अधिष्ठानत्वेनैव
प्रकारकं विद्यात् तुशब्दोऽवधारणे अस्य मायिनः परमेश्वरस्यावयवभूतैर्घटाकाशस्थानीयैः इहैव जातमित्यत्रेहस्थानीयैः सत्ता
स्फुरणे घटाकाशादिः सन्नाकाशादि स्फुरतीति व्याप्तं अध्यस्तत्वेन व्याप्तं न तु स्वपरिणामत्वेनात्रापि तुशब्दोऽवधारणे किं सर्व
मिदं जगत् सर्वं विभक्तमिदं दृश्यं जगत् अथवा मायायाः सत्तास्फुरणप्रदत्वेनाधिष्ठातुरस्येश्वरस्यावयवभूतैस्तैर्भिन्नभिन्नस्वर्ते
तैरेकदेशभूतैर्मायानुस्यूतैर्ब्रह्मविवर्तत्वेनैव व्याप्तं सर्वमिदं जगत् तस्यैवैकपदे इति तस्मान्मायाविवर्तत्वात् सर्वस्य प्रपञ्चजातस्य
तस्य सम्यग्दर्शनेन निवर्तयितुं योग्यत्वादद्वितीये ब्रह्मैकत्वज्ञानं सिद्धमित्युक्तमिति यतो इत्यभिप्रायः १० मायाख्यमल
योनेराकाशाद्यवान्तरयोनीनां चाद्वितीयस्तु स्वच्छचिन्मात्रवपुरीश्वरस्याधिष्ठातृत्वं मायामधिष्ठाय विषयाद्युत्पादकेऽस्य तं वि
यदाद्यवान्तरयोनिस्वरूपभेदेऽमलस्याद्वितीयत्वं तेन सर्वाधिष्ठानत्वेश्वरेणाहं ब्रह्मास्मीत्येकत्वज्ञानान्मोक्षसिद्धिं चाह य इति यः स्व
स्वच्छचिन्मात्रवपुरीश्वरो योनिं योनिं योनिः कारणमस्यानन्तरि इत्ययोनिं प्रकृतिमनादिसिद्धां प्रकृतिमित्यर्थः यावत्तत् यो मूलप्रकृ

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् १० यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सं च वि चैति सर्वम् तमीशानं वरदं देवमीड्यं निचाय्येमां शान्तिमत्यन्तमेति ॥ ११॥ ॐ ॥ छ

तिमधितिष्ठति अथवा योनिं योनिं योनिः स्थानमध्यात्मादिः तत्तदध्यात्मादिस्थानमधितिष्ठति नियमयत्यन्तर्यामिरूपेण अथवा
देवतिर्यङ्मनुष्यादिसर्वशरीरस्थेष्वपरजङ्गमादियोनियोनिप्रकृत्याधितिष्ठति यस्मिन्मायाधिष्ठा
तरीश्वरे स्वबोधवपुष्युपसंहारकाले सर्वमिदं जगत् समेति संगच्छति एकीभवति वि एति च सृष्टिकाले प्रपञ्चविभिन्नं विविधमेति विविध
नानारूपेणाभ्यभवति कारणे विविधरूपेण ताद्रूप्यं प्रतिपद्यत इति यावत् ये नेत्येके पठन्ति तत्राप्येषैव योजना तमीशानं प्र
तमीश्वरं तं वरदं मोक्षपर्यन्तानां वराणां दातारं देवं द्योतनस्वभावं तमनन्तस्वरूपमीड्यं वेदेतिहासपुराणस्तुत्यं निचाय्य निश्चयेना
हमस्मीति साक्षात्कृत्येमां शान्तिं सुषुप्तिप्रलयादौ सर्वसंहारोपलक्षणया शान्तिः अभिज्ञाता इमां सर्वसंहारोपलक्षणसर्वशा
न्तिं अत्यन्तामनन्तकालाविधारां अत्यन्तां पुनरावृत्तिरहितामेति एकत्वज्ञानेन ध्वस्तसंसारकारणो भवतीत्यर्थः ॥११॥ ॐ

अद्वितीयस्य स्वचिन्मात्रवपुष आत्मनो महदादिप्रपंचरूपेणावस्थानं महाकाशस्थानीयपरमात्मरूपेणावस्थानं संहृत्त
मत्तिगम्यत्वं तदेकत्वज्ञानान्मोक्षसिद्धिं चाह एष इति एषः प्रकृतो देवो ऽनंतसुखचिन्मात्रैकरसः विश्वकर्मा विश्वं मह
दादि जगत्कर्म क्रियत इति कर्म कार्यं मायावष्टंभ्याद्भुतं कार्यमस्येति विश्वकर्मा महात्मा महांश्चासावात्मा चेति महात्मा
महाकाशस्थानीयपरमात्मरूपेणापि स एव वर्तत इत्यर्थः सदा सर्वदा जनानां प्राणिनां हृदये ऽन्तःकरणगुहायां जले
पात्रे चंद्रवत्संनिविष्टः सम्यग्निविष्टः हृदयाद्युपलिंगशरीरस्य तत्तदुपहिततया साक्षितया च तस्मिन्सम्यग्निविष्टः जीवात्म
रूपेणापि स एव वर्तत इत्यर्थः हृदा हृत्स्थेन हृत् इति मरणात् हरतीति हृत् तेन नेति नेतीति निषेधोपदेशेन मनीषा ई
परमात्मनि ईश मनीषा परमा... यमात्मा मनो ऽत्मेत्यादि विचारेण सम्यक्संशोधितस्तस्य उभयसाध्यरूप ब्रह्मसाक्षीत्येकत्वज्ञानेनाभिक्लृ
प्ताऽभिप्रकाशितो ऽद्वितीयतया आत्मत्वेनाभिव्यक्तो भवतीत्यर्थः ये शमदमादिसंपन्नाः अनंतसत्यसुखचिन्मात्रैकरसं

एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये सन्निविष्टः हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवंति
१७ यदाऽतमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः

तत्पदार्थभूतं परमेश्वरमेतत् त्वंपदार्थभूतं प्रत्यगात्मत्वेन विदुः प्रतीचि कुर्वंति ते पुरोक्ता अमृता भवंति नित्यसि
द्धमुक्ता एव भवंतीति १७ प्रलयादौ मोहेश्वरस्याद्वितीयत्वावधारणाद्धि तस्मिन्काले विभागाभासद्वितीयत्वशक्तिभासः पर
मार्थतः सदा द्वैतशून्यत्वमेवेत्याह यदेति यस्यां विद्यावस्थायामतमो ऽनत्तमः अस्पष्टतमः शिवतत्त्वं सम्यग्दर्शनेन वाधि
तमूलाज्ञानत्वात् अविद्यातमस्त्वात् तत्तदा न दिवा दिवसकल्पनापि नास्ति न रात्रिः रात्रिकल्पनापि नास्ति न सद्भावकल्प
नापि नास्ति न चासत् अभावकल्पनापि नास्ति तर्हि सर्वं शून्यमेव तत्त्वेन ग्राह्यमिति नेत्याह शिव एव केवल इति शिव ए
व तत्त्वेनावशिष्यते न शून्यमित्येवकारार्थः शिवः अविद्यादिमलास्पृष्टः शुद्धसद्रूपः के
वलः विषयाध्यस्तमूलकारणतमस्त्वात् तन्मूलदिवादिविभेदशून्यत्वाच्चाद्वितीयः ॥ ५

ईश्वरस्य सर्वपोषकत्वं सर्वस्वामित्वं समष्टिव्यष्टिरूपकार्यकारणोपाधिषु प्रत्यग्रूपेणावस्थितत्वं सनकसनंदनवामदेवादिभिर्हिरण्यगर्भा
द्यधिकारिपुरुषैश्चात्मतया प्राप्तत्वं तस्यापि साधनचतुष्टयसंपन्नस्य योग्याधिकारिण ईश्वरैकत्वज्ञानान्मोक्षसिद्धिं चाह स एवे
ति स एवेतः परमेश्वर एव काले एवं कल्पेषु जीवैः संचितकर्मविपाककाले भुवनस्य गोप्ता समस्तभुवनस्य कर्मानुगुणतया आनंद
रक्षत्वेन रक्षिता विश्वाधिपः अध्यात्मादिभेदभिन्नस्य विश्वस्य स्वामी सर्वभूतेषु गूढः ब्रह्मादिस्तंबपर्यंतेषु समष्टिव्यष्ट्यात्मकेषु
सर्वेषु भूतेषु अंतःप्रविष्टः अप्रतीयमानं तदनुभवरूपेण गूढः सन्नेव तत्साक्षिमात्ररूपेण वर्तते यस्मिन्नेवमपास्ताशेषविशेषभूतं तव
पुःसुखचिन्मात्रे ब्रह्मणि ईश्वरे युक्ता एकतामापन्नाः के ब्रह्मर्षयः सनकादयः देवताश्च हिरण्यगर्भादयस्तमेवं ज्ञात्वा तमेवेश्व
रमेवमुक्तेन प्रकारेणाहमस्मीति ज्ञात्वा परोक्षतो मृत्युपाशान्छिनत्ति मृत्युर्वै तम इति श्रुतेः मृत्युशब्दाभिहितं तमस्त्वाख्यं मृत्यु
तद्विवर्तरूपाविद्याकामकर्माख्यान्पाशान्छिनत्ति नाशयत्येवं ज्ञानाग्निना दहतीत्यर्थः १५ ईश्वरस्य परमसूक्ष्मं निरतिशया

स एव काले भुवनस्य गोप्ता विश्वाधिपः सर्वभूतेषु गूढः यस्मिन्युक्ता ब्रह्मर्षयो देवताश्च तमेवं ज्ञात्वा मृत्युपाशांश्छिन
त्ति १५ घृतात्परं मंडमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढं विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥१६॥ छ छ

नंदस्वभावत्वं सर्वदोषैरसंश्लिष्टत्वं समष्टिव्यष्ट्यात्मके कार्यकारणसंघातेषु जीवरूपेण गूढतया स्थितत्वं सर्वस्य स्वरूपस्फुरणप्रदत्वे
न व्याप्तत्वमैश्वर्येण ज्ञा[illegible]नात्सर्वपाशापहारित्वं चाह घृतात्परं मंडमिति घृतात्परं मुपरिवर्ति
मान्नं मंडसारं सूक्ष्मं प्रीतिविषयं च यथा तद्वन्मुमुक्षुः प्रीतिविषयमतिसूक्ष्मं च व्यष्टिभूतेभ्यो विश्वाख्यं विराड्रूपं सूक्ष्मं तस्मा
त्तैजसाख्यं हिरण्यगर्भरूपं सूक्ष्मं तस्मात्प्राज्ञताख्याव्याकृतरूपं सूक्ष्मं तस्मादेतद्योनिरूपं सूक्ष्मं तस्मादपास्तसमस्तविशे
षापानंतसत्यसुखसंविन्मात्रं सूक्ष्ममेवमतिसूक्ष्मं ज्ञात्वा शिवं भवविपाकमकर्मादिमलैरसंस्पृष्टं ब्रह्मादिस्तंबपर्यंतेषु समष्टि
व्यष्ट्यात्मकेषु सर्वभूतेष्वनुप्रविश्य गूढं स्थितं च्छन्नं तेष्वात्मभावं विश्वस्य प्रवृत्तिप्राप्तितात्पर्येण एकमद्वितीयं सर्वोपहरज्ञात्वेति परि
[illegible] वेष्टितारं स्वस्वरूपप्रभया परिवेष्टितारं देवं द्योतनस्वभावं चिन्मात्रं तं ज्ञात्वा अहमस्मीति साक्षात्कृत्य मुच्यते सर्वपा
शैः श्रुतिप्राप्तज्ञानैः संसारपाशैर्मुच्यते अहं ब्रह्मास्मीत्येकत्वदर्शनेन बाधिताः अविद्यातत्कार्यसंसारपाशा भवंतीत्यर्थः

त्वात्संदृशे चक्षुरादीन्द्रियैः संदर्शनयोग्ये प्रदेशे न तिष्ठति न वर्तते चक्षुरादिभिः संदर्शनाय न तिष्ठतीति वा इन्द्रियैर्ग्रहीतुमयोग्यस्वरूप-
त्वादेनमीश्वरं च तथा चक्षुषेत्युपलक्षणमेतत् चक्षुरादीन्द्रियैः कश्चन कोऽपि न पश्यति गृह्णाति नराः कुत्रापि यच्चक्षुषा न पश्य-
ति येन चक्षूंषि पश्यतीत्यादिश्रुत्यंतरात् हृदा ध्यायमानेन नेति नेतीति शोधनरूपोपदेशेन हृदिस्थं हृदये हृत्कारगुहायां प्र-
त्यक्त्वेनावस्थितं मनसा संस्कृताहंकारजन्यानुध्यायनेनमेवं विदुः ये साधनचतुष्टयसंपन्ना योग्याधिकारिणः एनमात्मानमे-
वमित्थं विदुः अहं ब्रह्मास्मीत्यपरोक्षीकुर्वंति ते ब्रह्मास्मीत्यपरोक्षीकृत्वा अमृता भवंति अमरणधर्माणो भवंति मरणहेतु-
भूतदेहसंबंधशून्ना भवंतीत्यर्थः अत्रेति पावत् २० ईश्वराधीनत्वान्मोक्षसिद्धेस्तत्सिद्ध्यर्थमीश्वरप्रार्थनमाह अजात इति अजात इति
शब्दो हेत्वर्थः यस्मात्त्वमेवमुक्तप्रकारेणाजातः जन्ममरणाशनायापिपासाशोकमोहलक्षणषडूर्मिवर्जितो जन्मादिषड्भा-

नसंदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं हृदा हृदिस्थं मनसा य एनमेवं विदुरमृतास्ते भवंति
॥२०॥ अजात इत्येवं कश्चिद्भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम् ॥२१॥ छ छ छ छ छ छ ॥

वविकारवर्जितो वा ऽजात इति एवं यथा उपलक्षणत्वमितरेषां सर्वं जन्मादिमत्त्वाज्जन्मजरामरणाशनायापिपासाशोकमोह-
यन्तु वद्धात्संसारात् भीरुः भीतः सन् कश्चिदिति विशुद्धांतःकरणो योग्याधिकारी अहं प्रपद्ये त्वमेवत्तो प्रपद्ये शरणं प्राप्नुयां रु-
द्रः रुद्रं संसारदुःखं द्रावयतीति रुद्रः संहारकाले सर्वं रोदयतीति रुद्रः हे रुद्र यत्ते दक्षिणं मुखं तत्तव दक्षिणे दक्षं सुखं सुखमुल्लासं
त्वदेकावलंबनानां सवीजसंसारदुःखदाहसमर्थं सुखं निर्गुणं रूपं तत्त्वमसकलनिष्कलरूपा मध्ये मोहप्रशमनसमर्थं निर्गुणं
मुखं यत्तेन मोहप्रशमनसमर्थनिर्गुणमुखेन मां नित्ति विशुद्धांतःकरणं साधनचतुष्टयसंपन्नं योग्याधिकारिणं मां पाहि त-
द्रूपेणाहं ब्रह्मास्मीति बुद्धिफलकाहं तो भूत्वा संसारदुःखतद्बीजदाहकत्वेन पाहि रक्ष त्वं नित्यं सर्वदा शाश्वतं तथा निरतिशया-
नंदस्वभावाभिव्यक्तिं संसारतद्बीजोपशमनं च नित्यं यथा भवति तथा पाहीत्यर्थः प्रपद्यते इति केचित् पठंति तत्र कोपि मु-
मुक्षुः कश्चिन्मोक्षसिद्ध्यर्थं त्वामेव प्रपद्यते इतो हम्यपि मोक्षसिद्ध्यर्थं त्वामेव प्रपद्य इत्यध्याहारेणान्वयः ॥२१॥ ॐ॥

तदक्षरं तदिष्यते तमक्षरं न क्षरतीत्यक्षरं नित्यं तत्तच्छब्दार्थभूतं सवितुः सवितृमण्डलमध्यवर्तिनः सवितुरिति वरेण्यं वरणीयं
अथवा सवितुः स्थावरजङ्गमात्मकस्य जगदुत्पादयितुः मुमुक्षुभिः प्रार्थनीयं निर्गुणं वरेण्यं निरूपमिति वा वरेण्यं वरणी
यं संभजनीयमिति वा प्रज्ञा च प्रविभातं त्वं पदैतदहं निमित्ता अहं ब्रह्मास्मीत्येकत्वविषया लक्षणा प्रज्ञा च तस्मात् शिवा
द्धेतोः प्रसृता साधनचतुष्टयसंपन्नयोग्याधिकारिषु प्रसृता पुराणी आदित्यात् संप्रदायपरंपरया आगता अथवा यदा
प्रलयावस्थायां तमः न सदासीन्नो असदासीत्तम आसीदिति श्रुत्यन्तरोक्तेः आसीदिदं तमोभूतमिति स्मृत्युक्तेश्च यत्तमस्ते
वाविशिष्टं तत्तदानीं महदादिसर्वकार्यजातस्य मूलप्रकृतिः तमो माया तया अस्य विलयावस्थायां दिवादिरूपभेदो नास्ति इदं
सदिदमसदेव भावो अभावः इत्यपि भेदो नास्ति तावन्मात्रतया तत्समस्तविशेषं तमोऽपि विशेषवदविशेषाभेदेनावस्थितं
अतः शिवः केवलः तस्यामवस्थायामधिष्ठानत्वेनावस्थितः तच्छिववत्तमक्षरं न क्षरतीत्यक्षरं महाप्रलयावस्थायामपि स्थितत्वे

तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी १८ नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः १९

तन्नित्यं तच्छब्दार्थभूतं सवितुः सर्वस्य प्रसवितुः वरेण्यमुपास्यं वरणीयं रूपं च प्रज्ञा च प्रवृत्तिलक्षणा विद्या तस्मात् शिववत्त्वात् प्रसृता
पुरुषनिश्वासवत्तन्निमित्ता पुराणी अनादिसिद्धा नियतक्रमस्वरादिविशिष्टा सर्वदेत्यर्थः १८ परमेश्वरस्य सर्वतोऽनवग्रहमद्वि
तीयवपुष्मद्वितीयस्वरूपे केवलत्वात्तन्नवेनानुमेयत्वादिकं कालापरिच्छिन्नत्वं यशो नामत्वमाह। नैनमिति प्रकृतिशिवमूर्ध्व
नित्यत्वान्नवृद्धिरपि परिजग्रभत् न परिगृहीतुं न शक्नुयात् न तिर्यञ्चं दिक्षु अनवस्थितत्वात् तिर्यञ्चमपि परिगृहीतुं न शक्नु
तं न मध्ये निरवयवत्वाद् द्वितीयत्वाच्च मध्यस्याभावात् मध्येऽपि परिगृहीतं न तस्य प्रतिमास्ति तस्य सदृशस्यानन्तत्वात् अनुमि
तोऽप्यद्वितीयाभावात् न प्रतिमास्ति उपमा नास्ति यस्य नाम महद्यशः यस्य परमेश्वरस्य नामाभिधानं महद्यशः दिगाद्य
नवच्छिन्नपरिपूर्णयशः इति न तस्य प्रतिमास्तीत्यन्वयः १९ परमेश्वरस्येन्द्रियविषयत्वाभावात् योगप्रत्यक्षस्तेनावस्थानेनत्वे
न तत्त्वानामेव सिद्धिं चाह अस्येति अस्य परमेश्वरस्य रूपं स्वरूपं रूपादिहीनं निर्विशेषं स्वरूपं स्वयंप्रकाशं चिदेकरस

त्तद्विधेवत्तुशास्त्रावधारणार्थः क्षरमविद्याह्यमृतं तु विद्यायद्यमृतत्वसाधनं तत्तद्विधेवत्तुशास्त्रावधारणार्थः नित्यमोक्षपुरुषार्थ
प्रापकं यत्र विद्येव संसारकर्मा नित्यफलहेतुः कर्मविद्या नित्यमोक्षपुरुषार्थहेतुः शमाद्युपबृंहितश्रवणादिविद्या यस्मात्तस्मान्नि
त्यपुरुषार्थेप्सुभिः कर्माणि संन्यस्य शमाद्युपबृंहितश्रवणादिरेवाश्रयितव्य इत्यभिप्रायः विद्याविद्ये ईशाते यस्तु एवं मृते विद्या
विद्ये ——— ईशाते इति नियमयति यः परमेश्वरः तु शब्दश्चार्थे यत्र विद्याविद्ये निहिते यश्च विद्याविद्ये ईष्टे सोऽन्यः सत्ताभ्यां
मन्यः विद्याविद्ययोः स्वरूपप्रवृत्त्याऽधिष्ठानत्वात्साक्षित्वनियंतृत्वाच्च ताभ्यामन्यः १ परमेश्वरस्य मूलप्रकृत्यधिष्ठातृत्वे
सर्वशरीराधिष्ठातृत्वमवांतरप्रकृतीनामधिष्ठातृत्वं हिरण्यगर्भसृष्टत्वं तस्य विद्याप्रदातृत्वं चाह यइति सत्यसुखानुभूतिः
परमेश्वरः यो योनिं योनिमनाद्यनिर्वाच्यमायाख्यां मूलप्रकृतिं स्वस्मरणे प्रवृत्तत्वेनाधितिष्ठत्येकोऽद्वितीयो विश्वानि सर्वा
णि रूपाणि शरीराणि योनीश्च सर्वाः वियदाद्याः समष्टिरूपास्तद्व्यष्टिरूपाश्चावांतरयोनीश्च सर्वाः सत्तास्फुरणप्रदत्वेनाधिति

क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशाते यस्तु सोऽन्यः १ यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च
सर्वाः ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् २ एकैकं जालं बहुधा विकुर्वन् ॥ॐ॥ ॥र॰

ष्ठति ऋषिमृषिमिति ज्ञानं प्रसूतं स्वेनोत्पादितं कपिलं कनकवर्णं हिरण्यगर्भमिति यावत् यः परमेश्वरोऽग्रे सृष्टिकाले ज्ञाने
धर्मज्ञानवैराग्यैश्वर्यैर्वृत्त इत्यर्थः परिज्ञानैर्वा पुत्रं बिभर्ति वभार्त्तं अग्रे जायमानं पश्येदवांतरसर्गस्थितं तत्कर्तृत्वेन वेदसंप्र
दायकर्तृत्वेन च पश्येदपूरशीस एवमुमुक्षुभिरात्मत्वेन ज्ञातव्य इति वाक्यशेषः २ अंतःकरणसमष्टिं प्राणसमष्टिं चक्षुरादिज्ञाने
द्रियसमष्टिं वागादिकर्मेन्द्रियसमष्टिं च स्वमायया सृष्ट्वा तत्तद्रूपापन्नस्य परमेश्वरस्य तद्धिकृप्रमाणानां व्यष्टीनां सृष्टत्वं तदु
पाध्युपहितानां घटाकाशजलस्थानीयानां हिरण्यगर्भप्रमुखानां महाकाशविंबस्थानीयस्य तस्येश्वरस्य कारणत्वेन सर्वा
धिपतित्वं चाह एकैकमिति एकैकं जालं समष्टिरूपकार्यकरणानि जालानि पुरुषमृगाणां बंधनत्वात् जालं बहुजालानि एकैक
मेतः करणसमष्टिरूपं प्राणसमष्टिरूपं ज्ञानेंद्रियसमष्टीनामेकैकं कर्मेन्द्रियसमष्टीनां च मध्ये एकैकं स्थूलसमष्टिरूपं जालं तत्त
ज्जालावस्थापन्नः सन् बहुधा [illegible] विकुर्वन् तत्तत्कर्मोपासनानुगुणतया बहुधानंतव्यष्टिरूपकार्यकरणप्रका
कारेण विकुर्वैस्तत्तद्विपरीतत्वेन सृष्टिकाले कुर्वन् ॥

अस्मच्छिष्यप्रशिष्याः कार्यकरणानि च सम्यग्ज्ञानायोग्यत्वेन मा हिंसीः योग्यान्येव कुर्विति ईश्वरं प्रति प्रार्थनमाह मानइति मानः
अस्माकं विदुषां संबंधिनि तोके शिष्ये पुत्रे तनये पौत्रे प्रशिष्ये वा विषये मानः आयौ आयुषि मानो गोषु सम्यग्ज्ञानकारण
भूतेषु सम्यग्ज्ञानसाधनपरंपराप्रतिपादकेषु च वेदेषु मानः अश्वेष्विंद्रियेषु इंद्रियाणि हयानाहुरिति श्रुत्यंतरात् रीरिषः
मा रीरिषः इति सर्वत्र संबध्यते सर्वत्र सप्तमी विषयत्वेन हे ... तद्विषयां हिंसां मा कार्षीः रिषतिर्हिंसार्थः वीरान्मानो रुद्र भामि
तो वधीः वीरानिति ... मवत्तः परिचारकान्स्तानस्मान् अस्माकं संबंधिनः हे रुद्र भामितः भामः क्रोधस्तेन प्रचारेण क्रोधितः स
न वधीः मा वधीरिति पूर्वत्र प्रतिषेधेन संबंधः हविष्मंतः सदमित्त्वाह वामहे एते वयं सम्यग्ज्ञानयोग्यत्वसिद्ध्यर्थं वयं हविष्मंत
स्त्वदाराधनसाधनवंतो भूत्वा सदं सदा इत्त्वं सदैव त्वां हवामहे यजामहे त्वत्तत्त्वमाह्वयामहे इति वाक्यशेषो वा न केवलं निष्प्रयो
जनमिति वा सोऽप्रार्थ्यः किं तर्हि अभ्युदयायाधिभिरपीत्याह मानस्तोक इति हे रुद्र नो अस्माकं संबंधिनि तोके तनये पौत्रे च मा रीरिषस्तद्विषयां

मानस्तोके तनये मान ... आयौ मा नो गोषु मा नो अश्वेषु रीरिषः वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतः सदमित्त्वा हवामहे २२ इति
श्वेताश्वतरोपनिषदि चतुर्थोऽध्यायः ४ द्वे अक्षरे ब्रह्मपरे त्वनंते विद्याविद्ये निहिते यत्र गूढे ।। हिंसां मा कार्षीः मा न आयौ मान

आयुषि मा नो गोषु गवादिषु तथा नः अस्माकं वीरान् भामितः क्रोधितः तेन प्रचारेण क्रोधितो मा वधीर्वयं हविष्मंतो भूत्वा सदमि
त्सदैव त्वा हवामहे त्वामाह्वयामः २२ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादशिष्यस्य विज्ञानात्मभगवतः
कृतौ श्वेताश्वतरोपनिषद्विवरणे चतुर्थोऽध्यायः ४ ।। विद्याविद्ययोः परमेश्वरस्तत्र तु विद्यास्वरूपमविद्यास्वरूपं परमेश्वरस्य विद्या
विद्येश्वरत्वं तत्स्वरूपं ... चोपपादयितुं पूर्वाध्यायवत्तु पंचमाध्याय आरभ्यते प्रथमं विद्याविद्ये विधित्याह द्वे इति द्वे विद्याविद्ये अक्ष
रे न क्षरतीत्यक्षरं सर्वमश्नुत इति वाक्षरं अक्षरात्मके द्वे ब्रह्मपरे ब्रह्मणो हिरण्यगर्भात्परे अथवा ब्रह्म च तत्परं चेति ब्रह्मपरं
तस्मिन् ब्रह्मपरे परब्रह्मणीति यावत् छांदसः परनिपातः तुशब्दोऽवधारणार्थः तस्मिन्परब्रह्मण्येवानंते ऽनंते इति द्वे विद्याविद्ये
अक्षरे इति विशेष्यत्वेनान्वयो हि प्रोक्तः निहिते निहिते स्थिते परमेश्वराधीनस्वरूपप्रतिभासत्वान्निहिततया स्थिते यत्र यस्मिन् गूढे
स्वरूपप्रकाशाभावे ... सुखानुभूतिस्तेनानभिव्यक्ते विद्याविद्ययोर्लक्षणमाह क्षरं त्विति क्षरं त्वविद्या यत्क्षरं क्षरणे हेतुरित

श्वे०टी०
२४

परमेश्वरस्य वेदांतेषु गूढत्वं वेदांतानां कारणत्वं हिरण्यगर्भाभिधानस्य ब्रह्मणो वेदैर्वेदैर्विधिश्चात्मत्तथा अपरो जीवः तस्यात्मत्वं तथा परो जी
वेश्वरत्ते वानां स्वरूपतया निरतिशयानंदाविर्भावलक्षणं निःश्रेयसं संसारनिवृत्तिलक्षणं मोक्षं चाह तदिति तत्स्वप्रकाशमीश्वरतत्त्वं वे
दगुह्योपनिषत्सु वेदे कर्मभागे यच्छ्रव्यत्वेन फलप्रदातृत्वेन चावस्थितं गुह्ये आरण्यके सगुणभागे उपास्यत्वेनावस्थितं उपनिषदि
निर्गुणभागे ज्ञेयत्वेन चावस्थितं गूढं गूढरूपेणावस्थितं अपवीवदः ब्रह्मा सोऽगुह्ये इति वेदगुह्यस्तस्मादुपरिहस्यज्ञोपनिष
त्सु वेदांतेषु गूढं तच्च [illegible] नित्तास्यापाम्याप्रमेयत्वेन संवृत्तं तद्ब्रह्मा वेदते तत्तद्गूढमीश्वरतत्त्वं ब्रह्मा हिरण्यगर्भो वेदते जानाति ब्र
ह्मत्तया साक्षात्करोति ब्रह्मयोनिं वेदकारणं हिरण्यगर्भकारणं वा ये पूर्वं ये शमदमादिसाधनसंपन्नाः पूर्वं काले देवा अग्न्या
दित्यादयः ऋषयः वामदेवादयः अवतत्तत्त्वं हार्पंभूतं परमार्थतत्त्वं स्वात्मत्वेन विदुः परो जीवः तत्त्वतत्त्वं अपरोऽजीवः तत्परमा
त्मतत्त्वाः तन्मया अनुष्ठिताः नस्तमितानंदस्वभावेश्वरमयाः ईश्वरस्वरूपभूताः सम्यग्ज्ञानेनेश्वरभावव्यवधायकाविद्यात्तको
र्येहाहात्तन्मया अमृता अमरणधर्माणो जननमरणादिसंसाररहिताश्च बभूवुः ब्रह्मैव सन् ब्रह्माप्येति ब्रह्म वेद ब्रह्मैव भवती

त्यादि ॥ तद्वेदगुह्योपनिषत्सु गूढं तद्ब्रह्मा वेदते [illegible] ब्रह्मयोनिम्। ये पूर्वं देवा ऋषयश्च तद्विदुस्ते तन्मया अमृता वै बभू
तिश्चत्यंत्तरात् वेदत्ति शास्त्रप्रसिद्धिं न्यायप्रसिद्धिमनुभव)) वुः ॥ गुणान्वयो यः फलकर्मकर्त्ता कृतस्य तस्यैव स चोपभोक्ता
ख प्रसिद्धिं च दर्शयति प्रकृतस्य परमार्थभूतस्येश्वरस्य सत्यं सदिमाद्वैतस्यत्वमद्वितीयत्वमखंडत्वं वेदांतगम्यत्वमविकारित्वं
परमात्मस्वरूपत्वं च प्रतिपाद्यत्वं परमार्थभूतस्य जीवस्य कार्यकरणादिभ्यो वैलक्षण्यं स्वस्य सर्वानुभूतित्वमसंगत्वं नित्यत्वं पर
मात्मस्वरूपत्वं च प्रतिपादयितुमुत्तरे केचिन्मंत्राः प्रवर्तंते तत्र प्रथमं जीवस्य कर्तृत्वभोक्तृत्वादिसंसारः स्वाभाविको न भवति
किंतु देहेंद्रियाद्युपाध्यविवेककृत इत्याह गुणान्वय इति सत्त्वरजस्तमआख्यैर्गुणैरन्वयो यस्य स गुणान्वयः फलकर्मकर्त्ता ईषद्र
जोऽन्वित [illegible] सत्त्वगुणपरवशः सन् ज्ञानद्वारेण मोक्षार्थं कर्म करोति ईषत्सत्त्वान्वित रजोगुणपरवशः सन् स्वर्गादिफलसाधनं
कर्म करोति ईषद्रजोऽन्वित तमोगुणपरवशः सन्नरकादिसाधनं कर्म करोति एवं गुणपरवशः सन् फलार्थस्य कर्मणः कर्त्ता कृत
स्य स्वकृतस्य तस्यैव कर्मणः फलस्य यः फलार्थं कर्मेति अकारेण करोति स एवोपभोक्ता स च यो गुणपरवशो भूत्वा फलार्थी
नेकर्माण्युपचिनोति

२५

नैवेति अनास्वादिताशेषविशेषाणां तत्सुखचिन्मात्रैकरसस्वरूपत्वात्स्वतत्त्व एष जीवो नैवं स्त्रीत्वादियुक्तः किंत्वविद्याकामकर्मादि
वशाद्यद्यच्छरीरं मिथ्याभिमानादादत्ते स्वीकुरुते तेन तेन स्त्रियादिरूपेण तत्तच्छरीरधर्मवत्त्वादिरूपेण च संवित्तो नात्मा युज्यते संब
ध्यते अहं स्त्री अहं पुमान् अहं नपुंसकमहं जातो ऽहं कृशो ऽहं स्थूल इत्यादिमिथ्याभिमानपाशितस्तया संबध्यते च शरीरेण स्वतो वि
धीतो ऽशेषविशेषत्वं स्यादि यथा विश्वप्रभास्वकं च प्रदृश्यते ॥ आत्मनः कार्यकरणोपाधिपरिग्रहकर्तृत्वादिसंसारस्याभावे च किं
निमित्तमित्याकांक्षायामाह संकल्पनेति संकल्पनं मनसो व्यापारः तीर्थे यात्रां हिंसां न कुर्यामित्येवमादिरूपः पुण्यहेतुर्भ
वति सप्तवतीर्थे यात्रां हिंसां कुर्यामित्यादिरूपश्च पापहेतुर्भवति तेन संकल्पनेन स्पर्शनं त्वगिन्द्रियव्यापारो गंगोदकादिस्पर्शनं
पुण्यहेतुर्भवति चंडालादिस्पर्शनं पापहेतुर्भवति तेन स्पर्शनेन दृष्टिश्चक्षुर्व्यापारः सतां दर्शनं पुण्यहेतुर्भवति पतितादिदर्शनं
पापहेतुस्तेन दर्शनेन होमो हस्तव्यापारः अग्निहोत्रादिहोमः पुण्यहेतुर्भवति अभिचारादिहोमः पापहेतुस्तेन होमेन तत्तदिन्द्रिय
व्यापाराणामप्युपलक्षणमेतत् एतैः संकल्पनस्पर्शनदृष्टिहोमैर्ग्रासाम्बुवृष्ट्या ग्रासवृष्ट्याम्बुवृष्ट्या चान्नपानासहवृष्ट्याग्रासे

नैव स्त्री न पुमानेषः न चैवायं नपुंसकः। यद्यच्छरीरमादत्ते तेन तेन स युज्यते ॥ संकल्पनस्पर्शनदृष्टिहोमैर्ग्रासा-
म्बुवृष्ट्या चात्मविवृद्धिजन्म। कर्मानुगान्यनुक्रमेण देही स्थानेषु रूपाण्यभिसंप्रपद्यते १० ॥ ॥ ॥ ॥

म्बुवृष्टिरिति दानं अम्बुवृष्टिः सत्करादानं उत्तमदेशकालपात्रेष्वन्नाम्बुनोस्त्यागरूपदानं पुण्यहेतुर्भवति विपरीते च वितीर्णं दानं पाप-
हेतुः अपवादयोग्यायोग्येषु ग्रासप्रदानं पुण्यपापहेतुर्भवति अंबुदानं च तत्पात्रे वृष्टिर्वृ... छेदनं ग्रोवृष्ट्या च्छेदने अनर्पयन्वा
मनर्थी छेदनं पुण्यहेतुर्भवति अनर्थवतामर्थी छेदनं पापहेतुः ग्रासेनाम्बुना वृष्ट्या च ग्रासाम्बुवृष्ट्या चात्मविवृद्धिजन्म आत्म
न एते मांसकर्तृ विवृद्धिजन्म विवृद्धिश्च जन्म च विवृद्धिजन्मनी हिरण्यगर्भस्तम्बपर्यन्तासु योनिषु जन्म च विवृद्ध्यादीतरभावविकाराश्च
भवन्ति विवृद्धिरित्युपलक्षणं ममैवार्थं स्पष्टतया वर्णयति कर्मानुगानीति तत्कर्मानुसारीणि पुण्यानुसारीणि हिरण्यगर्भादिदेव
शरीराण्यानि रूपाणि पापानुसारीणि तिर्यग्रूपाणि समप्रधानतया वर्तमानपुण्यपापानुसारीणि मनुष्यशरीराणि अनुक्रमे
ण कर्मानुरूपक्रमेण देही लिंगशरीरोपाधिक आत्मा स्थानेषु ब्रह्मात्मादिभिर्भिन्नस्थानेषु वसादिपिपीलिकान्तेषु रूपाण्युप
लक्षणानि यान्यभिसंपद्यते अभितः समष्टिव्यष्टिरूपः समस्तकार्यकरणानि अहं सममभिमानं धांत्या संपद्यते संप्राप्नोति ॥१०॥

सः स्वकृतकर्मभिः सुरनरतिर्यगादिनानारूपतया वर्तमानत्वाद्विश्वरूपस्त्रिगुणः कामक्रोधलोभाख्यास्त्रयो गुणा यस्य स त्रिगुणः त्रिवर्त्मा
देवयानपितृयाणतिर्यङ्मार्गाख्यास्त्रयो मार्गा यस्येति त्रिवर्त्मा प्राणाधिपः प्राणादिपंचवृत्तेर्मुख्यप्राणस्य करणानां च तत्प्राण
नां चाधिपः स्वामी कार्यकरणस्वामी इति यावत् संचरति स्वकर्मभिः एको देवोऽद्वितीयस्तस्य पंचकप्राणाख्यसप्तदशकात्मकं
लिंगशरीरमात्मत्वेनाभिमत्य तदुपाधिकः सन् सत्त्वादिकामादिगुणपरवशो भूत्वा शुभाशुभानि कर्माणि कृत्वा तैः स्वकर्मभिः परवशो
भूत्वोर्ध्वमध्यवर्तिकान् लोकान् बुध्वा संसारदुःखमहोदधौ संचरति संचरन् परिभ्रमति ॥ एतस्य संपरस्य ॥ ६ ॥ अद्वितीये परमेश्वर एव जीवः
नान्य इति जीवस्य जीवत्वमेव परिच्छेदकत्वं चाहैतदुपाधिकत्वेनाभासत्वेनातात्त्विकत्वात् तत्तमः सर्वसाक्षित्वात् स्वप्रकाशाखण्डबोधैकरसः
त्वं चाह अंगुष्ठमात्र इति अंगुष्ठमात्रपरिमिते हृदयपुंडरीकगुहायां वर्तमानत्वादंगुष्ठमात्रः न तु स्वतोऽङ्गुष्ठमात्रपरिमाणपरिमि

स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिः ॥ ६ ॥ अंगुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः बुद्धे-
गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्टः ॥ ७ ॥ बालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः स चा-
नंत्याय कल्पते ॥ ८ ॥
तः रवितुल्यरूपः इदं जानामीति ज्ञातृतया तत्तद्व्यतिरिक्तं सर्वं न जानामीत्यज्ञातृतया च तत्तत्सत्तानन्तैरादि सर्वस्य साक्षित्वात् स्वचि-
च्चित्प्रकाशरूपः संकल्पाहंकारसमन्वितः मन उपाधिकत्वात् मनः संकल्पसमन्वितः अहंकारोपाधिकत्वात् अहमभिमानस-
मन्वितः संकल्पाहंकारसमन्वितो रवितुल्यरूपश्च यः सः बुद्धिलिंगशरीरस्य गुणेन परिच्छेदभेदादिना आत्मगुणेन स्वस्वरूपभू-
त चिद्गुणेन चैव बुद्धिधर्मपरिच्छेदेनैवाराग्रमात्रोऽन्यस्वतः आरभ्यताऽदस्तदृशपरिमाणाः स्वस्वरूपभूतचिद्गुणेनैव दृष्टः नान्ये-
नैव दृष्टः प्रकाशितः दीप्तः अवरः महाकाशाख्यानीयपरमेश्वरापेक्षया अवरोऽपि च भवति ॥ ७ ॥ अविद्याद्युपाधिकत्वाज्जीवस्य
तस्योक्तपरिच्छेदस्योपाधिकत्वेनाभासत्वं स्वतोऽद्वितीयत्वं चाह बालाग्रेति बालाग्रस्य यः शततमो भागस्तस्य पुनरपि शत-
धा कल्पितस्य तस्यापि विभक्तस्य यो भागः स यथा सूक्ष्मस्तद्वत्स जीवः अतिसूक्ष्म उपाध्यवच्छिन्नरूपेण सूक्ष्मो विज्ञेयः स चानंत्या-
य कल्पते चकारोऽवधारणे स जीव आनंत्यायैव कल्पते स्वरूपेणाद्वितीय एव भवति ॥ ८ ॥ स्वतः ईश्वरस्य तस्य जीवस्य लिंगशरी-
रोपाधिकत्वेन कर्मसंबन्धादिमान्द्येऽन्यो ज्ञानी स्वतः स्थूलदेहे तत्तत्कर्मान्यत्वं तावित्याः स्थूलदेहोपाधिकत्वं तत्तत्कर्मसाम्येन चाह ॥

तमेवं भूतं विश्वरूपमुपासकैर्यद्यद्रूपमुपासते तत्तद्रूपधारिणं अथ वा ब्रह्मादिपिपीलिकान्तानि विश्वप्रमुखाण्यपर्यन्तानि वि
श्वानि रूपाणि अस्येति विश्वरूपं भवभूतं भवश्चासौ भूतश्चेति भवभूतः भवेत्यस्मात्सर्वमिति भवः भूतः अवितथस्वरूपः
तं भवभूतमीड्यं सर्वेषां स्तुत्यं देवं चित्प्रकाशरूपं स्वचित्तस्थं चित्ताख्यलिंगशरीरस्थं पूर्वं पूर्वमेव तस्मिन्नवस्थाने स्थितं उ
पास्य अहं ब्रह्मास्मीत्यपरोक्षीकृत्यान्तःकरणशुद्ध्यापूर्वं जीवरूपेण स्थितं परमेश्वरमहमस्मीत्यपरोक्षीकृत्य मुक्तो भवती
ति वा सम्बन्धः पातीति पूर्वसंबंधः अयं मंत्र एवं निर्गुणवस्तुपरतया केश्चित् व्याख्यातः केश्चित्तु सगुणपरतया व्याख्यातः
अभिन्नत्वेन स्वचित्तस्थं स्वचित्ते शास्त्रेण निवेशितमुपास्य विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहरूपं तद्विषयो
पासनं कृत्वा सम्यग्ज्ञानोदयात्पूर्वं सम्यग्ज्ञानाधिकारसिद्धये पश्चात्तेन लब्धसम्यग्ज्ञानाधिकारो भवतीति योजयित
व्यं ५ परमेश्वरस्य संसारदोषास्पृष्टत्वं सर्वद्वैतकल्पनाधिष्ठानत्वं तत्कर्मेशापयितृत्वं निरंकुशैश्वर्यं तेन तज्ज्ञानान्मोक्षसि=

तं विश्वरूपं भवभूतमीड्यं देवं स्वचित्तस्थमुपास्य पूर्वम् ५ स वृक्षकालाकृतिभिः परोऽन्यो यस्मात्प्रपंचः परिवर्तते
यं धर्मावहं पापनुदं भगेशं ज्ञात्वात्मस्थममृतं विश्वधाम ६

किंचाह स इति स वृक्षतः परमेश्वरः वृक्षकालाकृतिभिः पंचमप्रथमतृतीयाद्युक्ताः संसारवृक्षस्तस्माद्वादिसमुक्तकालेन
विशेषेणानुस्यूतं कालेन तत्त्वकालशब्देनोच्यते तस्मात् आकृतिभिः समन्तात्स्थितिः विपरीतैः आकृतिर्महदादिसमस्तकार्यरूपेणाय
त्वात्प्रवृत्तिः क्रियते निर्वर्त्यते येषां तेऽधिष्ठात्रा परमेश्वरेणेत्याकृतिरिति शब्दप्रवृत्तिरुच्यते सर्वव्यापकत्वाद्वासेवाकृतिरित्युच्यते
तस्मात्पराः ज्यायान् तेभ्यो विलक्षणस्वभावत्वात् तेभ्योऽन्यः परः स्वयमुक्तरूपश्चेति पदद्वयस्य पर्यायेनैवार्थः यस्मादनन्तसुखचिन्मात्र
वपुषमीश्वरादयं प्रपंचः परिवर्तते स्वस्वरूपात्मेव अभ्युत्तरुपस्थितिमात्राद्यं प्रपंचः परिवर्तते यमात्मरूपत्वेन नित्यसंबंधात्
धर्मावहं धर्मावहन्तं पापं सुमार्गाद्व्यहृत्य उपासकैः कृतैनं पापनुदं भगः ऐश्वर्यं तस्येशं भगेशं ऐश्वर्यस्येशितृत्वात्कोकामिकमपि
पतिं आत्मस्थमात्मनि कार्यकरणसंघाते ताप्तित्रिबुद्धितत्स्वरूपेण स्थितं तत्त्वे न स्थितमात्मस्थमिति वा अमृतं जरामरणधर्म
रहितं विश्वधाम सर्वपीठेनां ज्ञानादिवृत्तिसत्यापात्मस्थं ज्ञात्वाऽहं ब्रह्मास्मीत्यपरोक्षीकृत्य संसारत्वीजं भवतीति वाक्यशेषः ६

तेषामभावे उत्तरोत्तरं कार्यं सर्वं पूर्वकारणमात्रतया प्रविलाप्य मूलप्रकृतिमप्यात्मनामायांशसच्चित्सुखैकरसे ज्ञस्वमात्रतया प्रविलाप्य तमीश्वरं स्वात्मतया अपरोक्षीकृत्य एवमीश्वरैकत्वापरोक्ष्यात्तेषां सर्वेषां प्रकृतिप्रकृतानामभावे दोषहेतुसत्तिकृतकर्मनाशः अनादौ संसारे कृतस्य पुण्यपापात्मकस्य कर्मणो नाशः प्रारब्धफलस्य नाशस्य केवलज्ञानोत्तरदाहः सम्यग्ज्ञानाद्यैककालभाविनाकर्मणो ज्ञप्यकर्तृत्वमूलत्वात् अन्येषफलत्वेण नाशः कर्मक्षयेऽपि उपभोगेन प्रारब्धफलस्य कर्मणः क्षयं याति विदेहमोक्षं याति देहेन्द्रियादिप्रतिभासानिवर्त्तते विद्याशक्तिप्रतिबंधकप्रारब्धकर्मनाशे प्रतिबंधशक्तिविद्यया देहेन्द्रियादिप्रतिभासमपि विमात्रतया विलाप्य देहेन्द्रियादिप्रतिभासेनापि शून्यं विदेहमोक्षं यातीति यावत् तत्त्वतोऽन्यः अन्योऽवस्थाद्वयसाक्षित्वादवस्थाद्वयातीतोऽन्यः सप्रकृतः सर्वभावोपसंहर्तीत्तत्त्वतोऽहं ब्रह्मास्मीति बुद्धिफलकाष्ठाभूतः तत्फलात्कृतस्य कर्मणो नाशो भवति प्रारब्धकर्मक्षये देहेन्द्रियादिप्रतिभासस्याप्यपहाद्विदेहमोक्षं यातीति यावत् तत्त्वतोऽन्य इति पाठे तत्त्वतः प्रकृतिप्राकृतेभ्यस्तत्त्वेभ्योऽन्य ईश्वरत्वं याती

तेषामभावे कृतकर्मनाशः कर्मक्षये याति स तत्त्वतोऽन्यः । क्लेशादिसंसंयोगनिमित्तहेतुः परस्त्रिकालादकलोऽपि ईश्वरः ॥ ५८

स्यार्थः अथवा अन्यस्तत्सर्वदोषाः नो सङ्कीर्तनिःसंगेश्वरस्तत्त्वतः परमार्थतत्त्वात्मरूपं यथा भवति तथा यातीति तस्येश्वरभावस्य वथापकं प्रकृतिप्राकृतं सर्वं एकत्वज्ञानेनैकत्वमात्रतया विलाप्य यातीति पर्यवसीयते सम्यग्ज्ञानसिद्धये मधिकारिसमर्थयपरमेश्वरोपासनमाह क्लेशादिरिति सर्वे ग्रामादिः स्वरूपस्फुरणप्रतिबंधेनाधिष्ठानभूतः सः प्रकृतः परमेश्वरः संयोगनिमित्तहेतुः सम्यक् योगः संयोगः जीवस्य परेण क्षपणितत्वलक्षणस्तस्य निमित्तानां साधनानां श्रवणमननादीनां निदिध्यासनादीनां च हेतुः कारणभूतः अथवा शरीरसंयोगनिमित्तानां पुण्यपापानां हेतुः परः त्रिकालात् अतीतानागतवर्तमानलक्षणात् त्रिकालाद्दूरतोऽन्यः कालानवच्छिन्नस्त्वरूपः अकलः कला अवयवा अस्य न सन्तीत्यकलः निरंशः इति यावत् अथवा प्राणादिनामान्ता अस्य न विद्यन्त इत्यकलः अपिशब्दः पूर्वसमुच्चयार्थः ईश्वरः अत्यन्तरे सुविदस्तु च ईश्वरः प्रकाशितः ॥ ५

ननु नेति नेतीति प्रतिषिद्धाशेषविशेषस्य परमेश्वरस्य शक्तिरित्याह तद्रूपं स्वाभाविकं न भवति किं तर्हि येन तद्रूपं स्वाभाविकमित्याह
स्वाभाविकी ज्ञानबलक्रिया चेति ज्ञानबलक्रिया सर्वविषयसर्वज्ञत्व णानुभूतिर्ज्ञानक्रिया सा सर्वेषाकारसर्वसत्त्व
गुणपरिणामरूपक्रियाभिव्यक्तत्वात् क्रियावद्वभासत इति चित्रेयमुच्यते सा ईश्वरस्य स्व रूपत्वात् स्वाभाविकी नान्यापत्ते
तिपावत् बलक्रिया च नाम स्वयं निधिमात्रेण गृह्णातीत्याह तं सर्वं वशीकृत्य नियमयति सा सर्वं कल्पनाधिष्ठानभूतस्येश्वर
स्य स्वाभाविकी नान्यायत्ता अथवा बलक्रिया बलं नाम अनन्तसत्ता तया सर्वस्य लयात्मकत्वात् सैव धातुर्वा त्वात् क्रिया तु
स्पन्दते क्रियाशब्दवाच्ये तैरपेक्ष्यसंनिधिमात्रेण प्रवृत्तिपाति यदि कार्यसत्तेति वचनात् तस्य सर्वपरीक्षा ज्ञानं ततोऽसंगेश्वरस्य स्वाभावि
की नान्यायत्ता ॥ परमेश्वरस्यानन्यपतित्वमीशित्रन्तरस्यान्यत्वेन तर्कागम्यत्वं सर्वकारणत्वं कार्योपाधिकानां जीवानां मुक्तिर्ह
रणाधिपत्वं तथा नियन्तृत्वं चाह नेत्यादि तस्य प्रकृतस्य परमेश्वरस्य कश्चिल्लोके पतिः स्वामी नास्ति लोके जगति नैवेशिता
नियन्तापि नास्ति नैव च तस्य लिंगमस्ति येनासावनुमीयेत प्रपंचाख्यकार्यदर्शनात्कारणमात्रमेवानुमीयते न कारणवि

स्वाभाविकी ज्ञानबलक्रिया च ॥ न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिंगम् । स कारणं करणाधिपाधिपो न
चास्य कश्चिज्जनिता न चाधिपः ९

शेषः अतः सर्वेशं ब्रह्म जगत्कारणमित्यस्यार्थस्य वेदैकसमधिगम्यत्वं नानुमानगम्यत्वमिति यावत् अथवा कार्यस्यासिं
द्धीनत्वाल्लिंगं कारणं तस्येश्वरस्य कारणमपि नास्ति स एव सर्वस्य परमेश्वर एव स्वमायया सर्वस्य जगतः कारणं करणाधिपा
धिपः सर्वमिदं प्रसमष्टिव्यष्टीनां ज्ञानशक्तिक्रियाशक्तिमद्रूपलिंगशरीरोपाधिकत्वाज्जीवः करणाधिपस्तस्याधिमस्तेन प्रकृत्यु
पाधिक ईश्वरोऽधिपः स्वामी अथवा करणाधिपश्चासावधिपश्चेति करणाधिपाधिपः अनेन तस्य तोऽनुभूतिवपुः परमेश्वर ए
व जीवरूपेणावस्थितत्वात् तद्रूपेण करणाधिपः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतेरन्तरात्मना प्रकृत्या
त्यमायोपाधिकत्वेन सर्वेषामधिपश्च लोके कारणत्वेन प्रसिद्धानां महदादीनामधिपतित्वेन हिरण्यगर्भादीनां च कारण
त्वेनाधिपतित्वेनान्यो विद्यते नैव दृश्यते नास्यापीश्वरस्य कारणान्तराधिपत्यं तच्चानुमीयत इत्याशंक्याह न चास्य
कश्चिज्जनिता न चाधिप इति मूलकारणत्वात् स्वयंसिद्धत्वाद् इति यत्त्वाऽस्य परमेश्वरस्य कश्चिदपि जनिता ज
पिता नास्ति किं च लोके प्रदृश्यः न चाधिपोऽस्य परमेश्वरस्याधिपः स्वाम्यपि नास्ति एवं अजः परमेश्वरः संसारदुःखमहो
दधिं तितीर्षुभिः स्वात्मत्वेन ज्ञातव्य इत्यभिप्रायः ९॥ ॥॥

ते

२१

करणा नां सर्वे क्रियाणा मधिपः ३

इदानीं मंत्रदृगभिप्रेतार्थमाह यो देव इति प्रध्वस्ताखिलभेदः स्वयंप्रकाशवपुरीश्वरस्तंतुनाभ इव ऊर्णनाभिः तंतुभिः स्वशरी
रप्रभवैरात्मानं समावृणोति संछादयति तद्वत् प्रधानजैः सर्वप्रकाशकमणिमीयतत्त्वशक्तिप्रधानं मायाशक्तिः तज्जैर्नामरूपकर्मभिस्तं
तुसमानैः स्वभावतश्च न पराधीनः स्वतंत्रः स्वेच्छया देवकल्पनाधिष्ठानभूतं स्वात्मानं स्वयमेव समावृणोति संछादयति स यः
परमेश्वरो नो ऽस्मान् शमादिसाधनसंपन्नान् दधातु ददातु धारयतु वा किं ब्रह्माव्ययं ब्रह्मणि चेतरव्ययं चेव ब्रह्माव्ययं देहत्वात्
ब्रह्मैकरूपं नित्यत्वादव्ययं एवंभूतः स्वात्मत्वेन वेत्तीति वा अव्ययः ब्रह्माप्ययमिति पाठे ब्रह्मण्यप्ययं विषयाव
लयं पक्वाविद्यातत्कार्यविलयमैकीभावं ददातु इत्यर्थः ॥१०॥ परमेश्वरस्य सर्वभूतेषु गूढत्वमंतर्वेश्म सर्वेषामंतरात्मत्वेन स्थि
तत्वं धर्माधर्मनियंतृत्वमनंतानुभूतित्वमद्वितीयत्वं निर्गुणत्वं चाह आत्मा जडस्वभाव इति ये वदंति तान्निराकरोति देव इति

यस्तंतुनाभ इव तंतुभिः प्रधानजैः स्वभावतः देव एकः समावृणोति स नो दधातु ब्रह्माव्ययम् ॥१०॥
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा ॥ ॥ ॥११॥

ये तु न स्वभावकं देवं सदा इत्यादिवत् आत्मनश्चिद्रूपत्वमित्युपगम्यात्मभेदं वदंति तान्निराकरोति एक इति एकस्मिं
श्शरीरे एक एवात्मेत्युपगमाद् देह इति पदेनात्मभेदं परेषां निरस्त इत्याशयेनाह सर्वभूतेष्विति स्वयंप्रकाशचिदेकरसः स
र्वभूतेष्वेकत्वेन वर्तते तर्हि कथं न उपलभ्यते इत्यत आह गूढ इति सर्वभूतेष्वेकत्वेनाप्यतीतोपि तेषु छन्नत्वेन वर्तमा
नत्वात् ध्यानभावसद्गतिपावित्र्य मणिमुक्त्ववत् सर्वभूतान्तरे देहे प्रावर्तित्वेनात्मनस्तेः गूढत्वाभ्युपगमे परिच्छिन्नत्वा
दिदोषः प्राप्नुयादित्याशयेनाह सर्वव्यापीति आकाशवत्सर्वमंतर्बहिश्च व्याप्य शीलमस्येति सर्वव्यापी तर्हि व्याप्यव्यापक
भेदवत्त्वात्मनः सद्वितीयत्वं प्राप्नोतीत्याशयेनाह सर्वभूतांतरात्मेति विषधरवेत्तलयोनादिषु रज्जुशुक्तिकाशवत्त्वावि
त्वाविद्याकल्पितत्वेनात्मनो भिन्नानां सर्वभूतानामंतः स्थितः सन्नात्मत्वेन स्वरूपत्वेन वर्तमान इति सर्वभूतां
तरात्मेत्युच्यते । ११ ॥ ११ ॥ ११ ॥ रामोह ॥ ११ ॥ ११ ॥

श

त्वेनप्रसिद्धानांनित्यत्वेहेतुत्वंचेतनत्वेनप्रसिद्धानांचेतनत्वेहेतुत्वंकर्मफलप्रदातृत्वंस॰ स्यूनतावैक॰ लस्मतंतदेकत्वनाना॰
त्मात्तसिद्धिर्वाह नित्योनित्यानामिति नित्यानांलोकेनित्यत्वेनप्रसिद्धानामाकाशादीनांनित्यत्वेहेतुस्तन्नित्यत्वेनतेषांनि
त्यत्वप्रतीतिरितियावत्‌नित्यत्वेनप्रतिपन्नानांमध्येसत्तान्नित्यइतिवाचेतनः चेतनानांलोकेचेतनत्वेनप्रतिपन्नानां
प्रमात्रादीनांचेतनंतस्यचेतनतेषांचेतनत्वप्रतीतिरितियावत्‌चेतनत्वेनप्रतिपन्नानांमध्येऽयंसत्तात्चेतनइतिवानि
त्यत्वेनचेतनत्वेनचप्रतिपन्नानामयंनित्यश्चेतनइत्येकोऽन्वयोव्यक्तोऽन्यस्तथा नान्योऽस्तीतिदृष्टेतिस्फुटयन्तरमाह एको
द्वितीयोबहूनांब्रह्मादिपिपीलिकांतानांयोऽखंडस्वसंविद्रूपःपरमेश्वरोविदधातिप्रयच्छतीतिकरोतीतिवाकामान्कामयंत
इतिकामाःसुखप्रतिबिंबितानिसुखानि गुणतयाविदधातितद्ब्रह्मकारणंजगतःकारणंसांख्ययोगाधिगम्यंसांख्येन
योगश्चसांख्ययोगौसांख्येवेदांतमहावाक्यतात्पर्यजन्यमहंब्रह्मास्मीतिसम्यग्ज्ञानंयोगस्तस्साधनंश्रवणमनननिदिध्या

ध्रुनित्योनित्यानांचेतनश्चेतनानामेकोबहूनांयोविदधातिकामान्‌तत्कारणंसांख्ययोगाधिगम्यंज्ञात्वादेवंमुच्यतेसर्वै
द्धुवैपाशैः१३नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः तमेवभांतमनुभातिसर्वंतस्यभासासर्वमि
सनादिःताभ्यांसांख्ययोगाभ्यांअधिगम्यंप्राप्यंज्ञात्वादेवंबोधैकसंज्ञात्वाब्रह्मास्मीत्यपरोक्षीकृत्यमुच्यतेसर्वपाशैःअवि
द्याकामकर्मादिभिःसर्वैःपाशैर्मुच्यतेपुनरावर्त्ततानापद्यतेसंसारेतद्बीजाभवादित्यर्थः१३परमेश्वरस्यादित्यप्रकाशैरप्रकाश्यत्वं
आदित्यादिप्रकाशानांसमस्तजगतोऽवभासकत्वेऽपि नतत्रेति तत्रब्रह्मणितत्परमात्मनिसर्वावभासकोपिसूर्योभातितद्ब्रह्मन
प्रकाशयतिसर्वांशेनावस्थास्तसर्वेषामात्मत्वात्‌रूपादिहीनत्वाच्चसहितेरधीनप्रकाशः योऽयंसर्वंप्रकाशयतिनतुस्वयंम
तः इतोपिचन्द्रतारकंभासयतितथाचंद्रतारकंनेमाविद्युतोभांतिकुतोयमस्मज्ञोचरोऽग्निः एवंसूर्योनभातितत्र कावार्ताऽस्मज्जो
रस्याग्नेरित्यर्थः तमेवभांतंस्वतोभारूपत्वात्प्रत्ययसाक्षिप्रमाणेनपश्यतयास्वरूपमेवभांतंसर्वंजगत्स्वभासात्पूर्वमेवदीप
मानमनुभातिसर्वंअनुजनैकाध्याससमनुसरमानाभासलक्ष्योभातिसर्वंमादित्यादिकंएवंचकिंबहुनाविश्वरूपेनतस्यपरमे
श्वरस्यभासास्वरूपभूतचैतन्यप्रकाशेनसर्वमिदंजगद्विभातिप्रकाशते१४

प्राकृता पूर्वकल्पनया हितसंस्कारानुगुणतया पुण्यपापबीजानुगुणतया च चेतनाचेतनात्मकं प्रपंचाकारेण मायाख्या प्रकृतिः परिणमयितृत्वम्। ईश्वरस्येश्वरत्वे दृष्टिर्नान्तरीयकर्मार्थाभिलाषमितरेषां तद्भावं चाह एक इति एकोऽद्वितीयो वशी सर्वमस्य वशे वर्तत इति वशी स्वाधीनः सर्वेन्द्रियवृत्तिनिष्क्रियाणाम् अचेतनत्वादेव चित्सन्निधिव्यतिरेकेण स्वतः प्रवृत्तिलक्षणक्रियाशून्यानाम् चेतनानां परमार्थतः कूटस्थानन्तचिदेकरसत्वात् स्वतः सर्वप्रवृत्तिलक्षणक्रियाशून्यानां चेतनानां बहूनां सर्वेषां बीजं प्रकृतित्वेन बीजं मायाविवर्तत्वेन बीजं सत्यसुखचिन्मात्रमेकम् अचेतनानां प्रकृतित्वेन बीजं मायाजन्यमेकमखण्डं च चेतनानां परमार्थतः कूटस्थानन्तचिदेकरसविवर्तत्वेन बीजं सत्यसुखचिन्मात्रमद्वयं बहुधा बहुप्रकारं यः करोति। यः अनादिसंसारेऽनेकजन्मसु संचितविहितप्रतिषिद्धविधाभिर्विहितप्रतिषिद्धकर्मभिरीश्वरप्रेरितो मायोपाधिकः परमेश्वरः स्वे साक्षात्समुपगतमायाबीजं महदादिप्रकारं करोति तमात्मनि मायोपाध्याः समुपगतं स्वनिजरूपं चिदेवबीजं समष्टिव्यष्टिकारणे

एको वशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोति। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥ १२

पाधिकहिरण्यगर्भादिनेकचेतनप्रकारं करोति तदात्मानं स्वयमकुरुतेति श्रुत्यंतरात् अप्येकः परमेश्वरः प्रलयकाले स्वस्मिन्नेव लीनानां निःक्रियाणां भोगार्थं मोक्षार्थं क्रियावर्जितानां स्वभक्तानां भोगापवर्गार्थं क्रियासिद्ध्यै पंच एकमद्वितीयं बीजं कारणं ब्रह्मविष्णुरुद्रादिरूपेणानुव्याहितरूपेण बहुधा करोति तमेवंभूतं परमेश्वरमात्मस्थमात्मनि कार्यकरणसंघाते बुद्धिगुहायां स्थितं ये क्रोधालोभामोहादिभावनाऽनुपश्यन्ति अनुसन्धाय व्यतिरेकाभावात्तेषां परमेश्वरानुसन्धानमनुसन्धाय पश्यन्ति अहमस्मीत्यपरोक्षीकुर्वन्ति ते धीरा विवेकिनस्तेषां परमेश्वरैकात्म्यदर्शिनां सुखं शाश्वतं नित्यं सिद्ध्यति नेतरेषां परमेश्वरैकात्म्यज्ञानसाधनहीनानां शाश्वतं सुखं न सिध्यतीति। अहं ब्रह्मास्मीत्येकत्वज्ञानादेव नित्यसुखप्राप्तिसिद्धेः उपासनेभ्यः कर्मभ्यो वाऽन्येभ्योऽपि नित्यसुखप्राप्तिर्न सेत्स्यतीत्यर्थः ॥ १२ ॥ परमेश्वरस्यैकत्वे नित्य

अमृतस्य परं सेतुं अमृतस्य संसारतो मुक्तिनिवृत्तिलक्षणमोक्षस्य परं परमं सेतुं सेतुरिव सेतुस्तमहं ब्रह्मास्मीति बुद्धौ व्रत्तिविवित-
त्वेन बुद्धिसंस्थं तत्त्वमविद्यातत्कार्यनिवृत्तिशास्त्राच्चतया निहन्ति स्वरूपं सम्यक्सम्यग्वेत्ति बुद्धि संवृत्तोपलक्षितं जीवपरं सन्त
त्वं स्वत्तिकोलकोविद्यात्तमस्तो ... ग्रन्थस्त्वत्तावेमात्र तत्त्वा... ग्रनेन सुखचिन्मात्रतया मोक्षे च स्थितमिति दग्धेन्धनानल
मिव त्स्यन्ते १९ यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः यथा चर्म वेष्टयिष्यन्ति मानवास्तदाकाशं वेष्टयिष्यन्ति मा
न वास्तदा देवं एवं स्लोकोक्तं निष्कलादि विशेषणविशिष्टं देवं अविज्ञाय आत्मत्वेनाज्ञात्वा दुःखस्य संसारदुःखस्यो
नाशो भविष्यति शिवमविज्ञाय वा तस्मादेवमवित्वा येऽस्मिन्मोक्षेत्त्वा शिवे शान्तिमे ... सम्मत्वाद्यधितिशाहतमले
रनादेः इति स्वरूपं शिवमविज्ञाय स्वयं २० संप्रदायपरंपरयोपागतापाद्यविद्याया मोक्षफलपर्यन्तं तत्त्वे दुर्शयितुं संप्र
दायविद्याधिकारिणं चाह तपःप्रभावादिति तपसः ... हस्तस्थत्वत्र तपःशब्दस्य ... अस्यानेकजन्मार्जि

अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् १९ यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः तदा देवमविज्ञाय दुःखस्या
न्तो भविष्यति २० तपःप्रभावाद्देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् अत्याश्रमिभ्यः ॥ ॥ ॥ ॥ १॥

तस्याश्रमप्रयुक्तत्वादिहितस्य कर्मणोऽपि तपसः नियमेषु तपः शब्दसति तत्र तपःशब्दस्य स्वरूपं दिदृक्षमनसोरेकाग्रल
क्षणस्य तपसो मनसश्चेन्द्रियाणां चैकाग्र्यं परमं तप इति स्मरणात्तपःशब्दस्य तानां एतेषां प्रभावात्सामर्थ्यात्देवप्रसादाच्च
मोक्षाधिकारसिद्ध्यर्थमनेकजन्मसु समार्जितपरमेश्वरप्रसादाच्च ब्रह्म ह ब्रह्मादिवितीयं तत्त्वं ह शब्देन संयोतयति श्वेताश्व
तरो नाम ऋषिर्विद्वान् एवं ज्ञानं ब्रह्मविद्वान् स्वात्मत्वेनापरोक्षीकृतं ब्रह्म तत्त्वं अथ शिष्येषु साधनं च चतुष्टयसंपन्निमाल
क्ष्यानंतरमत्याश्रमिभ्य इति श्रुतिः प्रजायामिति स्मरणात् अत्याश्रमः तत्रापि परमो हंसाश्रमः तानि वा एतान्यवरा
णि तपांसि न्यास एवात्यरेचयत् न्यास इति ब्रह्मेति श्रुतेः चतुर्विधा भिक्षवश्च कुटीचकबहूदकौ हंसः परमहंसश्च
योयः पश्चात्स उत्तमः इति स्मरणाच्चैषामत्याश्रमिणस्तेभ्यो अत्याश्रमिभ्यः ॥ ० ॥ ० ॥ ०॥ १॥

परमं यस्य वेदान्तं ब्रह्मतत्त्वं परममुत्कृष्टमपास्तातिशयात्त पवित्रं अशुद्धेः प्रकृतिप्राकृताख्यैः मलैरनास्पृष्टं इत्यं ऋषिसंघ जुष्टं ऋषीणां सनकसनंदनवामदेवप्रभृतीनां संघैर्जुष्टं सेवितं तेषां प्रीतं तत्त्वं सम्यक् सेवितमात्मत्वेन चेति यावत् प्रोवाच सम्यगित्यस्य काकाक्षिन्यायेन संबंधः तेभ्य एवं भूतं ब्रह्म सम्यक् प्रोवाचात्मत्वेनापरोक्षीकृतं यथा भवति तथा प्रोवाचेत्यर्थः २१ प्रोवाचेति प्रशब्देन गुरुमुपदेशकोपाल्यं दर्शयति वेदान्त इति सर्वोपनिषत्सु ज्ञातावेकत्व नं परमं परमपुरुषार्थरूपं गुह्यं गोपनीयं गुह्यतमं स्थितं पुराकल्पे प्रचोदितं पुराकल्पस्थैः प्रचोदितं सर्वं स्थिते न केनचिन्न प्रचोदितमुपदिष्टमिति वा संप्रदायपरंपरया सम्यग्ज्ञानमिति यावत् कल्पान्तरेष्विव गभीयप्रचोदितमुप दिष्टमिति वा नाप्रशान्ताय प्रशमरहितायोपाधिकारिसंपत्तिरहिताय न दातव्यं तथापि ना पुत्राय वा शिष्याय वा न दातव्यं प्रशां

पवित्रं प्रोवाच सम्यगृषिसंघजुष्टं २१ वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितं नाप्रशान्ताय दातव्यं नापुत्राया शिष्याय वा पुनः २२ यस्य देवे परा भक्तिर्य[illegible] था देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः प्रकाशन्ते महात्मनः २३ इति [illegible] श्रीश्वेताश्वतरोपनिषदि षष्ठोऽध्यायः ६

तायपुत्राय प्रशान्ताय शिष्याय वा दातव्यमित्यर्थः २२ देवतागुरुविषयनिरुपाधिकभक्तो विद्याप्राप्त्यंतरंगसाधन त्वमाह यस्येति यस्य मुमुक्षोर्देवे परमेश्वरे परा उत्कृष्टा निरुपाधिका भक्तिर्यथा तथा निरुपाधिका भक्तिर्गुरावपि विद्यते गुरुदेवतयोरेकत्वबुद्ध्या तस्य देवतागुरुविषयनिरुपाधिकभक्तिमतोऽनुपाधिकारिणो ह्येते कथिता अस्यामुपनिषदि भगवताश्वेताश्वतरेण कथिता उपदिष्टा हि यस्मात् ह्यर्थाः प्रकाशन्ते तथा वक्ष्यमाणा प्रकाशन्ते महात्मनः महानुभावस्य नान्यस्येति यस्मात्तस्माद्विद्यार्थिभिर्देवतागुरुविषया निरुपाधिका भक्तिः कर्तव्येत्यभिप्रायः द्विर्वचनमध्यायपरिसमाप्तिद्योतनार्थमादरार्थं च २३ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्ज्ञानोत्तमपूज्यपादशिष्यस्य श्रीमद्विज्ञानात्मभग वतः कृतौ श्वेताश्वतरोपनिषद्विवरणे षष्ठोऽध्यायः समाप्तः ६ ॐ हरिः॥ [illegible]॥ शिवोऽहं॥ १०८

श्वेताश्वतरोपनीषद् कृष्णयजुर्वेदीयो

पत्र ३८